व-३४

अथ—

* श्रीमिथिलामाहात्म्यम्भाषाटीका सहितम् *

॥ प्रारभ्यते ॥

पुस्तक मिलनेका पता—
कन्हैयालाल कृष्णदास
"श्रीरमेश्वर" छापाखाना,
दरभंगा

श्रीरामचन्द्रायनमः ।

श्रीरामायण सरण

पुस्तक मिलनेका पता—
श्रीमहन्थलाल मालिकके ड्योढ़ी पर
मो० ओ पो० देवोघा जि० दरभंगा

अशुद्ध	शुद्ध	पृ०	पं०
कीतु	किंतु	१६	१
याम	यामः	१६	१
विस्तार	विस्तारः	१६	२
राजा	राज	१६	४
इस्वाकु	क्ष्वाको	१६	४
खानिरू	खनिरु	१६	८
धनु	धनू	१७	३
भंवत्	भवत्	१७	२
शिरः	शिर	१७	४
पुन्य	पुन्य	१७	८
स्तूत	स्तुत	१५	८
ह	द	१७	६
विस्व	विश्व	१८	३
भुक्ति	मुक्ति	१८	४
पुण्यदा	सर्वदा	१८	५
तुष्टी	तुष्टि	१९	१
सांके	साके	१९	१
त्यक्ता	त्यक्त्वा	१९	२
स्थां	स्यां	१९	३
शम	शमः	१९	४
पुण्यां	पुण्यो	१९	४
त्पु	त्सु	२०	१
यज्ञा	याज्ञ	२०	२
शनदी	सनदी	२०	३
भूक्तिइ	भूक्तिरि	२०	४
लक्षणा	लक्षणाः	२१	२
वंस्या	वंश्या	२१	३
दायका	दायकाः	२१	४
किका	किकः	२२	२
यस्या	यस्याः	२२	३
पिणेनि	पिणा	२२	३
निभिः	धिभिः	२३	१
यपि	अपि	२३	२
वस	वसे	२३	३

२.

२

शुद्धाशुद्धिपत्र.

अशुद्ध	शुद्ध	पृष्ठ	पंक्ती	अशुद्ध	शुद्ध	पृ०	पं०	अशुद्ध	शुद्ध	पृ०	पं०
मैत्रे	मैत्रेय	१	२	द्वयो	द्वयोः	७	२	ज्ञान	ज्ञातं	१३	१
पूर्व	पूर्वं	१	२	ईति	इति	७	२	वदः	वद्	१३	२
परासर	पराशर	१	४	मनो	मनस	९	२	दवि	दपि	१३	३
ना	न	२	३	तर्को	वर्का	१०	२	देवतास्त	देवास्त	१४	१
घु	घू	३	१	पै	प	१०	२	पसर	पराशर	१४	१
घु	घू	३	३	सु	सू	१०	४	मति	मती	१४	३
द्वा	द्वा	४	२	ज्ञता	ज्ञात्वा	११	१	वेच्छा	वेच्छा	१४	५
ज्ञे	ज्ञेः	५	२	स्ये	स्यै	११	१	वम्तोद्भव	बतोभ	१५	२
ति	त्ति	६	१	स्वा	सा	१२	२	मोक्ता	मोक्ताः	१५	२
नीसका	निष्का	६	३	गर्ति	गति	१२	२	सख्य	सख्यः	१५	३
वे	य	६	४	स्यैपा	स्यैषा	१२	३	क्रिर्तिता	क्रिर्तिताः	१५	३
र्म्ती	म्ति	७	१	परम	परः	१२	२	डन्ती	डन्ति	१५	३

श्रीजानकीवल्लभोविजयतेतराम् (मतेन्द्रस्य) श्रीमन्मारुतनन्दनायनमः
श्रीमैत्रेउवाच ॥ श्रुतंत्वत्तोमयापूर्वंरहस्यं जानकीपतेः अयोध्यायाश्चमहात्म्यं-
तत्रावासफलंतथा ॥१॥ इदानीं श्रोतुमिच्छामि रामतत्वविवेचनं ज़ानवया-
स्तत्वसर्वस्वं यथावेदेषुवर्णितम् ॥२॥ श्रीपराशरउवाच ॥ सीतारामात्मकंतत्वं

श्रीसीतारामाभ्यां नमः॥ श्रीगनेशाय नमः श्रीमीथिलामहात्म्य ॥दो०॥ रामजानकीतत्वकोव
रणयोअध्याऐक रामायणसवक्षाडिके शखहूमनयहटेक ॥१॥ श्रीमैत्रयमुनिकहतेहै किहेसर्ववरहस्यज्ञ
मुनीश्वर परासरजी आपसेश्रीजानकीपति श्रीरामचंद्रजीके सम्पूर्णरहस्यऔरअयोध्यापुरीकामहा
त्म्य और उसी प्रकार अयोध्यापुरी में यात्रा करने का फल हम सुन चुके ॥ १ ॥ अव श्रीराम

चन्द्र और श्रीजानकी जीके तत्वका विचार जो वेदने वर्णन किया है वह सुना चाहता हूं ॥ २ ॥
परासरजी बोले कि हे मुनि श्रीसीताराम मय जो है तत्व वह सब कारणों का कारण है और रूप अ० १.
सर्वकारणकारणम् ॥ अनयोरैकतातत्वं गुणतोरूपतोपिच ॥ ३ ॥ तत्पदंराम
इत्युक्तंजानकीभावरूपिणी ॥ तयोरैक्यंभवेत्तत्व मितिवेदविदोविदुः ॥४॥ तत्व
तो मन्त्रतोवापि रूपतो गुणतोपिवा ॥ अपृथग्भावना यस्यसज्ञेयोभावकोत्तम ५
एवमेवम यापृष्टो वशिष्टोमासमादिशत् यथातंपद्मजः प्राह तत्समासेन मेश्रृणु
और गुण दोनो की जो एकता है उसी को तत्व कहते हैं ॥ ३ ॥ तत्व एसा इस पदमें तत्पद से २.
श्रीरामजू समझना और त्व पदका अर्थ है भाव उसको श्रीजानकीजी समझना इसी प्रकार दोनों

की एकता जो है उसी को वेद जानने वाले लोग तत्व कहते हैं ॥ ४ ॥ और तत्व ते और मंत्रते
और रूपते अथवा गुणते भी जिस को भावना पृथक नहीं है उसी को उत्तम भाव कहतेहैं ॥५॥ अ० १.

॥६॥ रामान्न मैथिलीभिन्ना मैथिल्यानरघूत्तम ॥ द्वयोरैक्यंविजानीयात्तत्वतो
नैकरूपतः ॥ ७ ॥ द्वयोर्नित्यंद्विधारूपं तत्वतोनित्यमेकता ॥ राममंत्रास्थिता
सीता सीतामन्त्रेरघुत्तमः ॥८॥ यतोवर्णात्मकोरामः सीतामात्रात्मिकाभवेत् ॥

इस प्रसंग को मैंने वशिष्ठ मुनिसे पूछा था और वशिष्ठ जीने जिस प्रकार श्रीब्रह्माजी के मुख से
सुन कर मुझसे कहा था वह सब मैं कहता हूं सुनिये ॥ ६ ॥ श्रीरामचन्द्र जूसे श्रीजाकीजू ३.
और श्रीजानकी जूसे श्रीरामचन्द्रजू कदाचिद् भिन्न नहीं हैं दोनों को तत्व करिके एकही जानो

केवल रूप देखनेमें दोहै ॥ ७ ॥ दोनों स्वरूप नित्य अर्थात् अविनाशी है और देखनेमें तो दोहै
परन्तु तत्त्व मे दोनों एकही हैं और राममंत्र में सीता औ सीतामंत्रमें रामजू सदा निवास कर

यद्वाशब्दात्मकोरामः सीताशब्दार्थरूपिणी ॥ ९ ॥ यद्वावाणी भवेत्सीतारामः शब्दार्थरूपवान् ॥ एवमेवविधानेन यथासूर्येप्रभास्थिता ॥१०॥ रत्नेमौल्यंन्टपे

ते हैं ॥ ८ ॥ जो वर्ण रूप रामचन्द्रजी हैं तो मात्रा रूप श्रीजानकीजी हैं और जो घटादि शब्द के
समान श्रीराम चन्द्रजी है तो घटादि सब्दका जो अर्थ है उस अर्थ के समान श्रीजानकीजी
को समझो ॥९॥ और वर्ण रूप श्रीजानकीजी है तो अर्थ रूप श्रीरामचद्रजी है जिस प्रकार ४.
सूर्य मण्डल में प्रभा रहती है उसी प्रकार श्रीरामचन्द्रजी में श्रीजानकीजी रहती हैं ॥ १० ॥

जिस प्रकार रत्नमें मोल और राजामें कीर्ति रहती है उसी प्रकार रामचन्द्र जीमें सीताजी रहती है और इसी प्रकार रामचन्द्र जी अर्थात् दोनों शरीर में दोनों सदा वीराजते हैं ॥११॥ अ० १.

कीर्ति स्तथारामेस्थितातुसा ॥ जानक्यां राघवोप्येव मद्वैतेनसदास्थितः ॥११॥ एवमेवद्वयोरैक्यं वेदज्ञैः परिनिश्चितं ॥ यथायोध्यापुरीनित्या मिथिलापि तथा स्मृता ॥१२॥ सर्वैश्वर्य्यगुणवीपि नायोध्यातः पृथग्मता ॥ अयोध्यका यथा नित्या स्सर्वमंगलरूपीणः ॥ १३॥ तथैव मैथिलास्सर्वे सर्वमंगलविग्रहाः नित्य

इसी कारन वेदके जानने वाले लोग रामचन्द्र जी और जानकीजी के स्वरूप को एकही कर के मानते हैं और जिस प्रकार अवधपुरी अविनासी है उसी प्रकार मिथिलापुरी कोभी अवि ५.

नामी कहते है ॥ १२ ॥ सम्पूर्ण एश्वर्य्य और गुणोंमे किसी प्रकार अवधसे मिथिला पृथक नहीं जानी जाती हैं और जिस प्रकार अवध वासी लोग नित्य और मंगल रूपहै ॥ १३ ॥

भुताः सदाशुद्धा पुनरावृत्तिवर्जिताः ॥१४॥ नित्यानंदरसास्वादु रूपीणो राम-पार्षदाः ॥ श्रीरामाराधकानाञ्च निवासार्थं विशेषतः ॥ १५ ॥ मिथिलासर्वथा पुण्या यथायोध्यातथाहिसा ॥ नीष्कामानां सकामाना मज्ञानां ज्ञानशालि नाम् ॥१६॥ कथंचित्तत्रचेद्वास उद्धारार्थंभवेदलम् ॥ तत्रयात्रामहापुण्या सर्वका

उसी प्रकार मिथिला वासी लोगभी सम्पूर्ण मंगल रूप है और नित्य और पवित्र और जरा मरन से रहित हैं ॥ १४ ॥ और नित्यानन्द रूप जो रस है उसीको येलोग पान करते है

और ये लोग श्रीरामचन्द्रजी के पास में रहने वाले हैं और श्रीरामचन्द्र जीके आराधक लोगों के रहने के लिये यह मिथिला देस निर्मित है ॥ १५ ॥ और यह मिथिला पुरी सर्वथा प्रशस्त और अवधके समान है और जिस को नाना प्रकार की कामना है अथवा जो कामना से

मसमृद्धिनी ॥१७॥ एवंरहस्यंतत्वस्य वर्णयन्तीमनीषिणः ॥ द्वयोर्नाम द्वयो-
र्धाम द्वयोस्तत्वं द्वयोर्व्रतम् ॥१८॥ द्वयोराराधनंचैव द्वयोर्प्रीतिकरंसमम् ॥ इति
येषांनचेद्भाव स्तेनराः पापभागिनः ॥ १९ ॥ संसारेषुनिमज्जंति स्वकर्मपरिवं-

रहित अर्थात् ज्ञानी है अथवा अज्ञानी है ॥ १६ ॥ जो किसी प्रकार प्राणी मिथिला पुरी मे निवास करै तो वह और लोगों का उद्धार करने में समर्थ होता है और मिथिला पुरी की यात्रा महा

पुन्य दायक है और सब कामना देनेकी सामर्थ्य रखती है ॥ १७ ॥ इस प्रकार रहस्य तत्व के पण्डित लोग वर्णन करते हैं और श्रीराम जानकीजी के नाम और स्थान और तत्व और व्रत ॥ १८ ॥ और दोनों रूप का आराधन एक है और वेदोनों प्रीति करने में तुल्य हैं यह

चिताः वशिष्ठेनसमाख्यातं त्वत्प्रीत्यै वर्णितंमया ॥ २० ॥ सिद्धान्तवीजमपरं शृणुष्वैकमनामुने सर्वाधारं जगन्मूलं सर्वकारण कारणम् ॥ २१ ॥ वेदवेदान्त

ज्ञान जिन को नहीं है वहीं लोग पाप के भोग करने वाले हैं ॥ १९ ॥ और वही मनुष्य इस संसार में अपने कर्म्म से वञ्चित हो कर विषय में डूवा हुआ है इतना कह कर पराशरजी वोले कि हे मुनि वशिष्ठ जीने जो मिथिला महात्म्य मुझसे कहाथा उसको मैंने आपुकी प्रीति

से वर्णन किया है ॥ २० ॥ हे मुनि अवमै शिद्धान्त का परस्पर कारण कहताहूं एक चित्त हो
कर सुनिए कि जो सब का आधार और जगतका कारण है उस कारण का भी यह कारण अ-
र्थात् हेतु है ॥ २१ ॥ वेद और वेदान्त और सिद्धान्तों के और ॐकार के स्वरूप है आदि

सिद्धान्तं यत्तत्प्रणवरूपकम् अनादिमध्यनिधनंव्यपदेशगुणैः परम् ॥ २२ ॥
वहिरन्तश्च निस्यूत मवाङ्मनोगोचरम् ।निष्कलंनिष्प्रतिद्वंद्वं निर्विकारं निरंञ्ज

और मध्य और अन्त रहित हैं कोई उनके गुण वर्णन नही करशक्ता ॥ २२ ॥ और वाहर और
भीतर निस्यूत अर्थात् समाये हुए है और मन और वचन से अगोचर अर्थात् अदृष्टि और नि-
ष्पाप और एक और विकार से रहित और निरंजन हैं ॥ २३ ॥ और सत्तामात्र अर्थात् अंश

ज्ञान हैं और परब्रह्म और सत् असत् अर्थात् स्थूल और सूक्ष्म के परे है यह बात विद्यवान् महातमा लोग अपनी बुद्धि के अनुसार ॥ २४ ॥ तत्व के जानने वाले अपने ग्रथों में जिस नि-

नम् ॥२३॥ सत्तामात्रपरंब्रह्म सदसत्परमेवयत विद्यावन्तोमहात्मानः स्वस्वत र्कानुसारतः ॥ २४ ॥ निरूपयन्तियत्किञ्चित् स्वस्वग्रंथेषु सात्विकं ॥ तस्य व्याप्यस्वरूपस्य निर्गुणस्य परात्मनः ॥ २५ ॥ प्रभावात्कारणंराम इति नार-द संमतिः तच्छक्ति जानकीरूपा तेनाभिन्नामहामुने ॥ २६ ॥ सूक्ष्मासं ज्ञानस-

गुण को निरूपण किया है उस निखिल रूपी निर्गुण परमात्मा का ॥ २५ ॥ कारण प्रभाव कर के श्रीरामचन्द्रजी जो परम ईश्वर है उनकी इच्छा रूपी जो सक्ति है सोई श्रीजानकीजी हैं इस

१०.

लिये श्रीरामचन्द्रजी से श्रीजानकीजी भीन्न नही है हे मुनि यह नारदजी की सम्मति है ॥२६॥
व्रह्म ज्ञान के थोड़ी कला कोभी मनुष्य अच्छे प्रकार से जान कर संसार पाश से मुक्त होजाते

११. वस्व मितिज्ञात्वा प्रमुच्यते ॥ ज्ञानस्यैषा पराकाष्टा सर्वभाव ज्ञसंमतिः ॥ २७ ॥ अ० १.
समाप्तिरत्रग्रन्थानां वाच्यवाच कसंपदां एतावद्वेद सर्वस्व मषावैब्रह्मसम्मतिः
॥ २८ ॥ यदनेनप्रकारेण सीतारामौ हृदिन्यसेत् ॥ सीतारामौस्वयंधर्म्मी सीता

हैं और ज्ञानी की उत्तम दसा एही है यह पदार्थ के जानने वालों कि सम्मति है ॥२७॥ वाच्य
और वाचक की सम्पदा जो है ग्रन्थ उसका ऐश्वर्य्य यही जानना यह व्रह्माजी की सम्मतिहै ॥२८॥
इस प्रकार से जो सीताराम है उनको अपने हृदय में धारण कर के दोनों स्वरूप को धर्म्म रूप और
सबके प्रभु एक समझना चाहिये ॥२९॥ और वही सीताराम संसार स्वरूप और संसार के कारण ११.

है जिनके लिये सब साधकों का बड़ा परिश्रम है ॥३०॥ और कितने चिन्हों से वह सीताराम चिन्हित हैं औ सज्जन लोगों के गति है और ज्ञान की उत्तम दिसा और विज्ञान कहिये अनुभव

रामौस्वयंप्रभुः ॥ २९ ॥ सीतारामौजगद्बीजं सीतारामौस्वयंजगत् ॥ सर्वेषां स्वाधकानाञ्च यदर्थंवै परिश्रमः ॥३०॥ लक्षणैर्वहुभिर्लक्ष्यैः सीतारामौ गतिं-सतां ज्ञानस्यै षापराकाष्टा विज्ञानस्याश्रयः परम् ॥ ३१ ॥ विज्ञायैतत्प्रयत्नेन कृतकृत्यो भवेन्नरः ॥ पठनाच्छ्रवणान्मर्त्यो मुच्यते सर्वपातकैः ॥३२॥ इति

के आश्रय है ॥३१॥ इसी प्रकार इस तत्व को जान कर वह मनुष्य कृत्य कृत्य हो जाते हैं ॥३२॥ ❀

इति श्रीवृहद्विष्णुपुराणे मिथिला महात्म्ये त्रयोदसोऽध्याय ॥ १३ ॥ १ ॥

दो०-पराशर ने उत्तर दियो, मिथला भू विस्तार । जुग अध्या देवता सकल, रामायण सुखसार ॥२॥

फिर मैत्रय जी ने कहा कि हे मुनि श्रीसीतापति के अतुल रहस्य मैंने सुना परंतु संक्षेप मात्र आप

मैत्रेय उवाच ॥ एतद्रहस्यमतुलं विज्ञानं जानकीपतेः ॥ पुनर्विस्तारतः किंचिच्छ्रोतुमिच्छामि तद्वद ॥ १ ॥ स्वरूपं नाम च व्यक्तं चरित्रं चापि विश्रुतं केषांचिदपि लोकेस्मिन्केषु शंका न विद्यते ॥ २ ॥ परं त्वयोध्यया तुल्या मिथिला वर्णिता त्वया तस्या विस्तारव्यायाम स्वरूपानि वदस्व मे ॥ ३ ॥ तस्या यात्रा कथं कस्मिन्

ने वर्णन कियाहै और मुझको विस्तार पूर्वक सुननेके इच्छाहै इसलिये आप विस्तार पूर्व्वक वर्णन कीजिये ॥१॥ श्रीराम जानकीजी के रूपका वर्णन और नाम और उन दोनोस्वरूपके चरित्र जो लोकमे विख्यातहै उसकोमैने सुना यद्यपि इस लोकमें कोई वस्तुके कोई स्थानमें मुझको शंका करना योग्य नही हैं ॥२॥ तथापि अवधके बराबर मिथिलापुरीको आपने वर्णन किया है अब उसका

प्रमाण वतलाइये कि कितना दीर्घ वो कितना विस्तारहै ॥३॥ और वहांपर किसकिस स्थानमे कौन कौन देवताहैं और मुक्तिकी इछावाले लोग किस किस कालमे वहांकी यात्रा करतेहैं सो वर्णन

कालेकार्य्यामुमुक्षुभिः केदेवतास्तत्रवसन्ति तेषांनामानिमेवद ॥ ४ ॥ श्रीपराशर उवाच॥ गंगाहिमवतोर्मध्ये नदीपंचदशान्तरे तैरभुक्तिरितिख्यातो देशःपरमपावनः ॥ ५ ॥ कौशिकीकमलाचैव तथावेत्रवतीमता यमुनाचेतिविख्याता भूयसीगैरिकातथा ॥६॥ जलाधिकादुग्धवती तथा व्याघ्रवतीमता । विरजामण्डनाचैव तथैवेच्छावतीतिच ॥ ७ ॥ लक्ष्मणावाग्वतीख्याता गण्डकीतिततःपरा ।

कीजिये ॥४॥ परासरजीबोले कि हे मुनि गंगा और हिमवंत पर्व्वतके बीचमे और पन्द्रह नदीके अन्तरमे परम पवित्र तिर्हुतदेश त्रयलोकमे प्रसिद्धहैं ॥५॥ अब मैं उन उन नदियोंके नाम कहता हूं प्रथम कौशिकी १ कमला २ वेलवती ३ यमुना ४ भूयसी ५ गैरिका ६॥६॥ जलादि ७ दुग्धव

ती ८ आम्रवती ९ विरजा १० मण्डना ११ इच्छावती १२॥७॥ लक्ष्मणादेई १३ वागवती १४ गण्डकी अर्थात् नारायणी १५ यहसब पूर्व दिशाके क्रमसे नदियोंके नाम मैंने वर्णन कियाहै ॥ ८ ॥ सिवाय इन नदियों के अकुछी और वर्त्तिनी और जंघा ॥ जीवायिका इत्यादि कितनी

इति पूर्व्वक्रमात्प्रोक्तं नदीनामानिदर्शयन् ॥८॥ अकुछी वर्त्तनीचैव जंघाजीवा-
पिकातथा । इत्याद्यावहवःसन्ति नद्योहिमवन्तोद्भवाः ॥९॥ कौशिकीतिनवप्रोक्ताः
सीतासख्यप्रकीर्तिताः सखीरूपेणक्रीडन्ती जनकस्यगृहेसदा ॥ १० ॥ त्रियुगा
कमलाचेति गण्डकीअधिवारिणी । धुम्रावोत्ववर्तीचैव वनघोषाचलक्ष्मणा ॥११॥

नदियां हिमवान् पर्व्वतसे निकलकर इस मिथिला देश में वहतीहैं ॥९॥१०॥११॥ कौसकी से नारायणी तक मिथिलापुरी की लम्बाई पूर्व पश्चिम में छियानबे कोशहैं ॥ १२ ॥ और हे कुलनन्दन श्री गंगाजीके प्रवाहसे हिमवन्त वनतक इस देशका प्रमान चौसठ कोशका

है ॥१३॥ और इस देसके मध्यमें जो मिथिला नाम पुरी अति प्रसिद्ध और अत्यन्त पुण्याहै इसके पांचकारणहैं ॥१४॥ एकतो यहकी राजा इक्ष्वाकुके पुत्र राजा निमिने यहांपर

कौशिकीन्तु समारभ्य गण्डकीमधिगम्यवै योजनानिचतुर्विंशत व्यायामंपरिकीर्तितः॥१२॥ गंगाप्रवाहमारभ्य यावद्धैमवतंवनं। विस्तारःषोडशप्रोक्तो देशस्य कुलनन्दन ॥१३॥ मिथिलानामनगरी तत्रास्तेलोकविश्रुता पंचभिः कारणैः पुण्या विख्याताजगतीत्रये ॥१४॥ निमिर्नाममहराजा इक्ष्वाकुस्तनयोनृपः तेनतप्तंतपोघोरं तेनख्यातंतपोवनम् ॥१५॥ सुवर्णखानिरुत्पन्ना पूर्वेस्मिंस्तु

आकर अत्यन्त घोर तपकिया इसलिये इसकानाम तपोवन विख्यातहुआ ॥१५॥ फिर उसी तपोवन में पूर्वकालमें सोनेकी खानि उत्पन्नहुईथी इसलिए उसकानाम स्वर्णकानन भी प्रसिद्ध हुआ ॥१६॥ फिर उसी राजा निमीने वहांपर एकनगर निर्म्माणकिया और वहांका मालिक अ

अ० २. १६.

पने पुत्र मिथि नामको बनाया इसलिये उसकानाम मिथिला विख्यातहुआ ॥१७॥ एकतो यह अ० २.
भूमि राजा निमिका तपस्थानहै और शिवके सन्तुष्ट करनेमे समर्थहै और यहांपर धनुषरत्न
तपोवने । सुवर्णकाननं नाम तेनख्यातं पथंमतं ॥ १६ ॥ पुनस्तथैवनगरी नि-
र्मितानिमिनामुने । तत्रजातो मिथिर्नाम तेनसामिथिलाभवत् ॥ १७ ॥ देवरात
तपोभूमिः शिवतुष्टीकर मता । यत्प्राप्तंधनुरत्नं तेनसा शांम्भवीवभौ ॥ १८ ॥
पुनःशिरध्वरोराजा स्वर्णलांगलपद्धतौ । प्राप्तवांस्तनयांयत्र तेनसाधिकविश्रु-
ता ॥ १९ ॥ धनुर्यज्ञंकृतंपूर्वं पुत्र्यर्थंयत्स्वयम्वरे । वित्रोटितंधनुर्यत्र रामेणाद्भुत
 कर्मणा ॥ २० ॥ एतद्दर्थंविशेषेण ब्रह्मरुद्रादिदेवताः । समर्चयन्तियत्नेन निव-
प्राप्तहै इसलिये इस अस्थानका नाम शाम्भवीभी विख्यात हुआ ॥१८॥ और इहांपर उसीवंसके १७.
राजा शीरध्वजने सोनेके हलसे पृथवीको जोताथा और जानकीनाम कन्या पायाथा इससे यह

भूमि अधिक तीनोंलोकमें विख्यातहुई ॥१९॥ उसी कन्याके लिये वह राजा शीरध्वजने धनुष जज्ञ किया था कि जिसस्वयम्बरमें आश्चर्यित कर्म्म करनेवाले श्रीरामचन्द्र जीने धनुषको तोडा अ २

सन्तिस्तुवंतिच ॥ २१॥ मिथिलातैरभुक्तिश्च वैदेहीनैमिकाननम् । ज्ञानक्षत्रंकृपापीठं श्वर्णलांगलपद्धतिः ॥२२॥ जानकीजन्मभूमिश्च निरपेक्षाविकल्मषा । रामानन्दकरीविश्व भावनीनित्यमंगला ॥२३॥ इतिद्वादशनामानि यःपठेच्छृणुयादपि । सप्राप्नुयाद्रघुश्रेष्ठं भुक्तिमुक्तिंचविन्दति ॥२४॥ प्रयागादीनितीर्थानि सन्ति लोकेषुपुण्यदा । परन्तुरामप्राप्त्यर्थं तेषांशक्तिर्नविद्यते ॥२५। इयंसर्वप्रकारेण

था ॥२०॥ इसलिये ब्रह्माजी और महादेवजी आदि संपूर्ण देवता मिथिला देशकी पूजाकरते हैं और यत्नपूर्वक वहां निवासकरतेहैं और सदा मिथिलाके गुणानुवाद गातेहैं ॥ २१ ॥ मिथिला और तिरभुक्ति वैदेही और नैमिकानन और यज्ञक्षेत्र और क्रियापीठ और स्वर्णलांगलपद्धति ॥ १८

२२॥ और श्री जानकी जन्मभूमि और निरपेक्षा। और विकलमखा और रामानन्दकरी और नि
त्यमंगला ॥२३॥ इन बारहनामोंको जो मनुष्य पढे अथवा सुनै वहभी श्रीरघुनाथजी को प्राप्त होकर
भुक्ति अर्थात् नानाप्रकारके भोग और चारो प्रकार की मुक्ति पाताहै ॥२४॥ इसलोकमें प्रयागादि

रामतुष्टिकरीध्रुवम्। यथा साकेतनगरी जगतःकारणंस्फुटम् ॥२६॥ तथैवानन्द
सर्वस्व कारणंनगरीत्वियम्। महर्षयो महाभागास्त्यक्तासर्वपरिग्रहम् ॥ २७॥
निवसन्ति प्रयत्नेन रामाराधनहेतवे। विश्वामित्रस्तुपूर्वस्यां दिशिवासमकल्प
यत्। २८। विभाण्डकोमहायोगी दक्षिणेनिवसत्यसौ। गोतमस्याश्रमंपुण्योयाम्य

जितनें तीर्थहैं वहसब पुण्यदहैं परन्तु उनसब तीर्थोंमें कोई तीर्थ ऐसा समर्थ नहीहै जो श्रीरामचन्द्रजी
तक पहुचादे। २५। यहजो मिथिलापुरी है सो श्री रामचन्द्र जीको संतुष्ट करनेमें समर्थ है निश्चय करके
जिसतरह साकेतनगर सब जगतका कारणहै ॥२६॥ उसीप्रकार आनन्दरूप जो सर्वस्वहै उसका

१९

कारण मिथिलापुरीहै और बड़बड़े महर्षि और भाग्यवान् लोग जो हैं सो अपना सम्पूर्ण विषय छोड़कर ॥२७॥ श्रीरामचन्द्रजी के अराधन के लिये निवास करतेहैं और इसके पूर्व्वदिसामें यत्न पुर्व्वक विश्वामित्र निवास करतेहैं ॥ २८ ॥ और विभाण्ड नाम महायोगी इसके दक्षिणदिसामें नि-

पश्चिमकोणके ॥२९॥ निवसत्युटजंकृत्वा वाल्मीकिस्तत्रपश्चिमे । उत्तरेयज्ञावल्क्यस्तु निवासेभिरतः सदा ॥ ३० ॥ एवमेवप्रकारेण वसंत्यन्यमहर्षयः ॥ अनदीमातृकादेशः दुर्भिक्षादिविवर्जितः ॥ ३१ ॥ सदाम्रवनसम्पन्नो नदीतीरेषु संस्थितः तीरेषुभुक्तियोगेन तैरभुक्तिइतिस्मृतः ॥ ३२ ॥ हिमालयस्य चासन्न

वासकरतेहैं और गौतमजीका महापुण्यद आश्रम इसके दक्षिण पश्चिमकोण परहै ॥२९॥ और इसके पश्चिमदिसामें पत्रकुटी बनाकर वाल्मीकजी और उत्तरदिशामे याग्यवल्क्यजी निवास करतेहैं ॥ ३० ॥ इसी प्रकार और औरभी कितनें महर्षि लोग मिथिलापुरीमें निवास करतेहैं और जो

कि यह पुरी नदियों से संयुक्तहै इसलिये यहां दुर्भिक्षादि नहीं पडताहै ॥ ३१ ॥ और नानाप्रकार
के धान्यादिक से युक्त और अनेक प्रकारके वन वाटिका से शोभितहै और सुन्दर स्त्री और
पुरुष सम्पूर्ण दुखसेवर्जित इसमें निवास करतेहैं और यहां की भूमि सर्व्वकाल सम्पन्न रहतीहै
मुनिभिः परिरंजितः ॥ राजानश्चमहाभागा ज्ञानविज्ञानदर्शनाः ॥ ३३ ॥ जीव
न्मुक्ताविदेहाश्च देहवन्तोविकल्मषाः॥ अनुष्ठितारोयज्ञानाम् ब्राह्मणातिथिपूज
काः ॥ ३४ ॥ निमिवंश्याऋषिप्राया वसन्त्यत्रमहामुने ॥ अन्यत्किंयत्रसावित्री
गौरीश्रीदेवशक्तयः ॥ ३५ ॥ निवसंतिप्रयत्नेन सर्वसिद्धिप्रदायकाः। यत्रसाक्षा
और सव वस्ती नदीयों के किनारे परहै और उन नदियोंके तटपर नाना प्रकार के मुक्ति अर्थात
भोगहै इसलिये यह पुरी तैर भुक्ति नामसे विख्यातहै ॥ ३२ ॥ यह मिथिलापुरी जो हिमालय
पर्वत के समीप वडे वडे महात्मा मुनिलोगोंसे शोभितहै इससे जो राजालोग थे वह सव ज्ञान

और विज्ञानके दर्शी और भाग्यवानथे ॥ ३३ ॥ और वहलोग जीवन मुक्त और निष्पाप और विदेह योगी और अर्थात् सदा यज्ञ करनेवाले और ब्राह्मणपूजक थे ॥ ३४ ॥ यहांपर निमिवंशी राजालोग ऋषि के समान निवास करतेहैं और कहांतक कहूं की लक्ष्मी और गौरी और सावित्री

स्स्वयम्भूमा सीतासर्वेश्वरेश्वरी ॥ ३६ ॥ आविर्भूताविशेषेण श्रेष्ठाराघववल्लभा । सर्वेदेवामहाभागा ऋषयोब्रह्मलौकिकाः ॥ ३७ ॥ अराधयंतियांयत्नात्स्व-स्वेष्टार्थप्रकाम्यया यस्याःप्रसादतोन्यत्र कल्पकोटिशतैरपि ॥ ३८ ॥ नप्रीणाति

इत्यादिक देवशक्तियां ॥ ३५ ॥ यत्नपूर्वक संपूर्ण सिद्धियोंकी देनेवाली निवास करतीहै और सब इश्वरोंकी इश्वरी अर्थात् सबदेवताओं की पालन करनेवाली श्री सीताजी पर साक्षात् आप आकर ॥ ३६ । श्रीरघुनाथजीकी श्रेष्ठा प्रिया प्रगट हुईहैं और देवता और ऋषि और बडे बडे भाग्यवान्लोग वेद और लोक दोनोके जाननेवाले जोहैं सो ॥ ३७ ॥ जिन श्री जानकीजीका आ-

राधन अपने अपने अर्थसिद्धि होनेके लिये करतेहैं और जिस प्रसादके लिये दूसरे स्थानमें पर
सौ कल्प वासकरके ॥ ३८ । और कोटियोग तपस्या करके भी श्री रामचन्द्रजीकी तृप्त करके
प्राप्त करै यह सामर्थ शिवाय मिथिलाके और किसी तीर्थको नहींहै इसलिये यह मिथिलापुरी

रघुश्रेष्ठस्तपोयोगसमाधिभिः ॥ अतस्तीर्थेषुसर्वेषु मिथिलापूज्यतेसदा ॥३९॥
मिथिलांयेनमस्यन्ति देशान्तरगताअपि तेषांभुक्तिश्चमुक्तिश्च जायतेनात्रसंश
यः ॥ ४० ॥ तस्मात्सर्वप्रयत्नेन रामस्याराधकोनरः । निवसेन्मीथिलांपुण्यां
त्यक्त्वासर्वपरिग्रहम् ॥ ४१ ॥ इति श्रीवृहद्विष्णुपुराणे मिथिलामाहात्म्ये द्विती

सब तीर्थोंपर सदापूजनीयहै ॥ ३९ ॥ जोकोई देशान्तर में भी रहकर मिथिलापुरी को नमस्कार
करताहै वह निस्सन्देह भुक्ति और मुक्ति पाताहै ॥ ४० ॥ इसलिये रामाराधक लोगोंको चाहिये
कि अपनासब परिग्रह अर्थात् संसारी कार्य्यत्याग कर यत्नपूर्वक मिथिलापुरीमें निवासकरना आज्ञ

कारकरै ॥ ४१ ॥ ❀ ॥ इति श्री वृहद्विष्णु पुराने मिथिलामहात्म्ये चतुर्दशोऽध्यायः ॥१॥१४॥
दो०शील सरोवर देवी ओ परिकरमातीन सरणरामायण तीनमें वरणों संतप्रवीन॥३॥टी० मैत्रेयमुनि
फिर प्रश्नकरतेभये कि हेमहाभागअवमिथिलामें जोलिङ्ग औरजहांपरजिसदेवताकमन्दिरहै उसका
योऽध्यायः ॥ २ ॥ ❀ ॥ मैत्रेयउवाच ॥ यानिलिंगानिपुण्यानि यानिदेवालयानि
च । तत्रसंतिमहाभाग तेषांनामानिमेवद ॥१॥ श्रीपरासर उवाच ॥ शिलानाथा-
भिधंलिंगंतथावैकापिलेश्वरम् । सर्वसिद्धिप्रदंनृणांपूर्वद्वारप्रतिष्ठितम् ॥२॥ कूपेश्वरं
तथाग्नेये लिंगंसर्वाघनाशनम् । याम्यांसिद्धिप्रदंलिंगं कल्याणेश्वरनामकम् ॥३॥
नाम मुझसे वर्णन कीजिये ॥१॥ परासरजी बोले कि हे मुनि श्रीनिमिपुरीके पूर्वद्वारपर शिलानाथ
नाम करके महादेव और कपिलेश्वरनाम लिङ्ग मनुष्योंको सिद्धि देनेवाले है ।२॥ और अग्नेयकोण
पर कूपेश्वर नाम लिंग सम्पूर्ण पापके नासक और दक्षिण दिसापर कल्याणेश्वर नाम लिंग

सर्व्वसिद्धियो के देनेवालेहैं ॥३॥ और वरूण दिसा में जलेश्वर नाम लिङ्ग सब सिद्धियों के देनेवालेहैं और उत्तरदिसा में जलाधिनाथ और क्षीरेश्वर नामकर के लिङ्गहै ॥४॥ और इसानकोन पर तीनोलोक में विख्यात मिथिलेश्वर महादेवहैं और नैर्ऋत्यकोण पर ग्रामके रक्षा

सर्वसिद्धिकरंलिंगं वारुण्यांच जलेश्वरं ॥ सौम्येजलाधिनाथाख्यं तथा क्षीरेश्वरं मतं ॥४॥ ऐशान्यांत्रिजगत्ख्यातं नम्नावैमिथिलेश्वरम् ॥ भैरवाख्योमहादेवो नैर्ऋत्यांग्रामरक्षकः ॥ ५॥ एवमादिनिलिंगानि नैकशः संस्थितानिच ॥ योग-निद्रामहामाया तथा नगरदेवताः ॥ ६ ॥ गिरिजाद्यामहाभागा ख्यातापरमश-

करनेवाले भैरव नाम महादेवहैं ॥५॥ वह आदिकरके पृथक् पृथक् कितने लिंगहै और नगर देवता योग निद्रामहामायाहैं ॥६॥ और गिरिजा आदि महाभगवती शक्तियांतोसब मिथिलापुरी में विदितही है परन्तु अन्य२ सरोवर भीपुण्यदायक वहां वर्त्तमानहैं उनके नाम सुनीये ॥७॥

वड़ापवित्र पुरन्दरसर और दसरथसर और भार्गवसर और मण्डनासर और राक्षसर और विडालसर आर रूक्मिणीसर अर्थात् तालावहै ॥ ८ ॥ और वड़ापवित्र जनकसर और

त्कथः॥ वहूनिपुण्यखातानि तेषां नामानिमेश्रृणु ॥ ७ ॥ पुरन्दरसरःपुण्यं ततो दाशरथंसरः ॥ भार्गवंमण्डनञ्चाच्छं विडालं रूक्मिणीसरः ॥८॥ जनकस्यसरः पुण्यं सुनेत्रायासरस्तथा ॥ वलदेवसरस्तत्र गोपालस्यसरोवरम् ॥९॥ धनुक्षेत्र मितिख्यातं पादप्रक्षालनंसरः ॥ विचित्राधूतपापाच तथाचुन्चुवतीमता॥१०॥ पयस्वनीकुण्डवती विख्याताताैलदीर्घिका ॥ लक्ष्मणाख्यागुणवती तथा विल्व

सुनेत्रासर और वलदेवसर और गोपाल सरोवरहै ॥९॥ और धनुषक्षेत्र जिस को धनुषसरोवर कहतेहैं और पादप्रक्षालन और विचित्रा और धूतपावन्ती और चुनवति नाम सरोवरहै ॥१०॥ और पयश्विनी और कुडवती और तिलदीर्घिका और लक्ष्मणा और गुनवती और विल्ववती

नाम सरोवर है ॥११॥ और दीर्घिका महापुण्या और इष्टदा और विषहारिणी और मत्स्योदरी और व्याघ्रहरा और स्थिदा और क्षत्रधारिणी नाम सरोवर हैं ॥१२॥ और गोब्रजा और चित्रधारा और पूर्णव्रता और दुर्गम्या और चित्रधात्री और कष्टहरी और सुधासर हैं ॥१३॥

वर्तमाना ॥११॥ दीर्घिकामहतीपुण्या इष्टदाविघ्नहारिणी ॥ मत्स्योदरीव्याघ्रहरी स्थितिदाक्षत्रधारिणी ॥१२॥ गोब्रजाचित्रधाराख्या ख्यातापूर्णव्रतातथा ॥ दुर्गम्याचित्रधात्रीच तथाकष्टहरीसुधा ॥१३॥ पुण्यापाकवतीख्याता तथा नगरदेविका ॥ सनकादिसरःपुण्यं तारणंमान्मथंसरः ॥ १४॥ मन्थानंकौशलंचक्रं

और बड़ापवित्र पाकवती और नगरदेवीका और सनकादिसर और मन्मथसर इत्यादि तारण अर्थात संसारसमुद्र से तारदेने में समर्थहैं ॥१४॥ और मंथानलसर और कौशलसर और चक्रसर और लोमससर और रामसागर और ससवेधसर और ध्रुवसर और गरुड़सर हैं ॥१५॥ और

केदारसर गाग्निकुण्ड और मध्यमाकुण्ड जानकीकुण्ड और कुम्भोदक और वरुनसर और सारस्वत-
सर ॥ १६ ॥ और चतुर्दीर्घिका और कष्टहर और धात्री और विषहर और मुरलीसर संपूर्ण
लोमसं रामसागरम् ॥ मत्स्यवेधाभिधंतीर्थं ध्रुवगारूडमेवच ॥ १५ ॥ केदारंवह्नि-
कुण्डञ्च मध्यमंजानकीसरः ॥ कुम्भोदकंवारुण्यञ्च तथा सारस्वतंसरः ॥ १६ ॥
चतुर्दीर्घिकमाख्यातं तथा कष्टहरंसरः ॥ धात्रीसरोविषहरं विख्यातंमुरलीसरः ॥
॥ १७ ॥ गंगासागरमित्युक्तं अङ्गरागाभिधंसरः ॥ गौतमस्यसरःपुण्यं वशिष्ठस्य
सरस्तथा ॥ १८ ॥ इत्युक्तं सरसान्नाम कूपनामानिमेशृणु ॥ पुण्यंसैरध्वजकूपं
विख्यातहैं ॥ १७ ॥ और गंगासागर और अंगरागसर और गौतमसर और वशिष्टसर अतिपवित्रहैं ॥ १८ ॥
यहतो सरोवरों के नाम कहे अबपरम पुण्य कूपों के नाम कहतेहैं सुनो कि सिरध्व जकूप और
सतानन्द कूप अतिपवित्रहे ॥ १९ ॥ और अक्रूरकूप और सैमन्तकूप और विद्याकूप और ज्ञानकूप

अ० ३.

२८.

जो तीनोंलोकमें विदितहै ॥२०॥ ये सब जलाशय जिनके नाम मैंने वर्णनकिये इनसब का स्नान और पान बहुत पुण्यदायक हैं ॥ २१ ॥ सज्जन जनका जब बड़ा पुण्य उदय होताहै तब मिथिला पुरीमें जन्म होताहै और मिथिलाके यात्रा काल जो विहितहै उसमें पण्डितलोग ॥२२॥ बड़ी

सतानन्दस्यकूपकम् ॥१९॥ अक्रूरकूपमित्युक्तं कूपंसैमन्तकन्तथा ॥ विद्याकूपं ज्ञानकूपमितिलोकेषु विश्रुतम ॥ २० ॥ जनकस्यमहर्षेस्तु कूपंपरमशोभनम् ॥ तत्र स्नात्वाच पीत्वाच पुनर्जन्मनविद्यते ॥ महाभागवतश्रेष्ठ वर्णितायेे जलाशयाः ॥ तेषांस्नानेनपानेन महापुण्यं फलंलभेत ॥२१॥ पुण्यातिरेकतोल-

भक्ति करके यात्रा करते हैं यह पुराणमें कहाहै कि मिथिलामें जाकर मुण्डन और उपवासकरै यह मिथिलामें प्रशस्त अर्थात् विहितहै ॥ २३ ॥ किसी प्रकारसे जो मिथिलामें यात्राकरै तो सर्व सिद्धिको पावै एकदिन अथवा दो दिन अथवा तीनदिन अथवा महीनेभर अथवा वर्षदिन जो

मिथिलामें वासकरै तो ॥२४॥ जन्मभर वास करनेका फल और पुण्य पाकर संसार बन्धनसे छूट जाय ऐसा पुण्यहोताहै और जिसतीर्थ में जोदेवता हैंतिनका उद्देश करके वहां गमन

स्या मिथिलाजायते सताम् ॥ तस्ययात्रा महाभाग तत्तत्कालेषुसूरिभिः ॥२२॥ क्रियतेपरयाभक्त्या पुराणेषु विनिश्चितम् ॥ मुण्डनञ्चोपवासश्च मिथिलायां प्रशस्यते ॥ २३ ॥ येनकेन प्रकारेण गमनंसर्वसिद्धिदम ॥ एकाहं वा द्व्यहंवासो मासिकंवार्षिकन्तथा ॥२४॥ जन्मावधिफलंपुण्यं संसारोच्छित्तिकारकम् ॥ अटनं सर्वतीर्थेषु तत्तदुद्दिश्य दैवतम् ॥ २५ ॥ स्नानं दानं तपोहोम स्तर्पनंश्राद्ध

करै ॥२५॥ और स्नान दान जप होम तर्पण श्राद्धकरै अर्थात् पितरों को पिण्डदान देवे ब्राह्मणभोजन करावे यह सब तिर्थों की सम्पत्ति है अर्थात् जात्रा का फलहै ॥२६॥ इस मिथी-लापुरीकी परिक्रमा तीन प्रकारकी है वृहती और मध्यमा और लघु और परिक्रमा करनेके

महीने यहहै अगहन फाल्गुन चैत वैशाख ॥ २७ ॥ और परिक्रमा करने वाले को चाहिये कि पहिले कौशिकी नदीसे आरम्भकरै और ब्रह्मचर्य्यव्रतको धारनकरै और हविष्यान्न भोजनकरै और जितेन्द्री रहै ॥ २८ ॥ और पवित्र होकर दो वस्त्र रक्खै और बहुत भक्तोंके साथ होकररहै

भवच ॥ विप्राणाम्भोजनञ्चैव तीर्थसम्पत्तिहेतवे ॥ २६ ॥ परिक्रमापि त्रिविधा हहतीमध्यमाल्घु ॥ मार्गशीर्षेथवामाघे फाल्गुने माधवेपिवा ॥२७॥ परिक्रमा प्रकर्त्तव्या नदीमारभ्य कौशिकीम् ॥ ब्रह्मचर्य्यविधानेन हविष्याशीजितेन्द्रियः ॥२८॥ शुद्धोद्विवासकोभूत्वा भक्तवृन्दैः समन्वितः ॥ सिंघेश्वरं शिवं नत्वा

प्रथम सिंहश्वर महादेवको प्रणामकर रामचन्द्रजीको अस्मरणकरै ॥ २९ ॥ और प्रथम सङ्कल्प करके तब परिक्रमा जहांपर कौशिकी संगमहै स्नान करके चलै फिर गंगाजीमें विधिवत् स्नान करै ॥३०॥ फिर जबतक शालग्रामी मिले तबतक पश्चिमओर चले फिर शालग्रामी नाम नदी

में स्नान करके हिमगिरीको जाय वहांसे फिर कौशिकीके तटपर पहुंचे ॥ ३१ ॥ तब कामेश्वर
नाम महादेव को प्रणामकरै फिर सिंद्धेश्वर स्थानको आवे वहांपर अपना नियम समाप्तकरके
ध्यात्वादेवंरघूत्तमम् ॥२९॥ संकल्पमादितः कृत्वा परितःपरिसंक्रमेत् ॥ कौश
की संगमेस्नात्वा संक्रमेजाह्नवीतटे ॥ ३० ॥ शालग्रामीलभेद्यावत्तावद्दैप श्चिमा-
मुखैः ॥ पुनर्हैमवतंप्राप्त पुनस्तत्कौशिकीतटं ॥ ३१ ॥ नत्वाकामेश्वरंलिंगं पुनः
सिंधेश्वरं व्रजेत ॥ समाप्यानियमं तत्र पुनर्यायात्स्वमालयम् ॥३२॥ मनोवाक्काय
जनितं पातकञ्चोपपातकम् ॥ सर्वन्नश्यन्ति यत्नेन सर्वान्कामानवाप्नुयात् ३३
अपने घरको आवे ॥ ३२ ॥ हे मुनि उस मनुष्यको कायिक और वाचिक और मानसिक और
उपपातक अर्थात् जो दैविक होजाते हैं यह सम्पूर्ण पाप नाश होजाते हैं और उसकी सब काम- ३२.
ना पूरी होजातेहैं ॥३३॥ और उसके ऊपर पितर और देवता और सीता सहित रघुनाथ तृप्त हो

जाते हैं ॥३४॥ यहतो बृहती यात्रा ब्रह्मवादी अर्थात् ब्रह्मके जानने वालोंने कहाहै और जो लोग असमर्थहों वह पुरीमात्रकी परिक्रमा करलें ॥३५॥ कल्याणेश्वर से आरम्भ करके गिरिजा स्थानपर रहे वहांसे चलकर जलेश्वरपर रहै फिर वहांसे चलकर क्षीरेश्वरमें दर्शन करकेरहै ॥३६॥ वहांसे चलकर

प्रीयन्तेपितरस्तस्य प्रीयन्तेसर्वदेवता ॥ प्रीयन्तेराघवोरामः स्वशक्त्यासीतया-सह ॥३४॥ एवंहिबृहतीयात्रा वर्णिताब्रह्मवादिभिः ॥ तत्रासक्तोजनःकश्चित् पुरी-मात्रंपरिभ्रमेत् ॥३५॥ कल्याणेश्वरमारभ्य निवसेद्गिरिजालये ॥ पुनर्जलेश्वरं गत्वा पुनःक्षीरेश्वरं व्रजेत् ॥३६॥ विश्रम्यधनुषस्थाने पुनःकल्याणपीठके ॥ एवंपञ्चा

धनुषक्षेत्रपर विश्राम करके फिर कल्याणेश्वर क्षेत्रपर जाय यह पञ्चाह्निक परिक्रमा मैंने वर्णनकियाहै ३७ और प्रलाप अर्थात् बातका बढ़ावा और बिलाप और मिथ्या भाषण और असद्वार्ता अर्थात् निन्दित वार्त्ता छोड़देवे यह उत्तम साधकहै ॥३८॥ और जो बिधि प्रथम कह आये हैं उसको सम्यक

प्रकार करके ब्रह्मचर्यव्रतरक्खै और निष्ठीपन अर्थात् थूक खखार और मलमूत्रादि बायें तरफकरै
॥३९॥ जो कोइ मूर्खतासे आचार छोड़कर अनाचार करताहै उसको पाप होताहै और वह श्री
हरिकीप्रोक्ता मिथिलायापरिक्रमा ॥३७॥ प्रलापञ्चविलापञ्च मिथ्याभाषणमेव
च ॥ अश्लीलवार्त्तादिकंसर्वं वर्जयेत्साधकोत्तमः ॥३८॥ पूर्वोक्तविधिनासम्यग्ब्रह्मच-
र्यव्रतेस्थितः ॥ वामेनिष्ठीवनंद्वार मलमूत्राणिचोत्सृजेत् ॥३९॥ अन्यथाचेच्चरे
न्मौर्ख्यान्नरः प्राप्नोतिकिल्बिषम् ॥ प्रयातिचाधमाँल्लोकान् रामद्वेषीभवेत्तुसः
॥४०॥ तस्माच्छुद्धतनुःशान्तो भजन्राममनन्यधीः ॥ परिक्रान्तोलभेद्भुक्तिं
रामचन्द्रजीसे शत्रुताको पाकर अधर्म लोक अर्थात् नरकमें जाताहै ॥४०॥ इसवास्ते शुद्ध शरीर
और शान्त और अनन्य अर्थात् सर्वत्र व्यापक बुद्धिकरके श्रीरामचन्द्रजीकी सेवाकर इस प्रकार
परिक्रमा करनेसे मनुष्य लोकमें नाना प्रकारके सुख और परलोकमें परम मुक्ति पाताहै ॥४१॥

यह परिक्रमा जो मैंने वर्णन किया सो मध्यमाहै इसको करनेसे सम्पूर्ण पाप नाश होजाते हैं जो मनुष्य इस परिक्रमाके करनेमें भी असमर्थ हो तो अन्तरगृही परिक्रमा करै ॥ ४२॥ गंगासागर से प्रारम्भकरै स्नान यात्रा नियम करके धनुषक्षेत्रमें स्नानकरै तब पुरन्दरनाम सरोवरको जाय

लोकेमुक्ति तथापरं ॥ ४१॥ मध्यमा साभवेद्यात्रा सर्वाघौघनिवारिणी ॥ तत्रा प्यशक्तश्चेत्कश्चित्परिक्रान्तोत्तरं गृहम् ॥ ४२॥ गङ्गासागरमारभ्य स्नानयात्रा समारभेत् ॥ धनुः क्षेत्रं पुनःस्नात्वा पुरन्दरसरोव्रजेत् ॥ ४३ ॥ कौशलेन्द्रसरो गत्वा गत्वावै जानकीहूदे ॥ वह्निकुण्डंसमागत्य मध्यमंकुण्डमाव्रजेत् ॥ ४४ ॥

॥४३॥ दशरथ सरोवरमें स्नानकरके तब जानकी कुण्ड अग्निकुण्ड मध्यमा कुण्डमें क्रमसे स्नान करै ॥ ४४॥ और रत्नसागरमें जाकर स्नानकरै तब कौण्डिल्य सरोवरको जाय वहांसे अङ्गराग नाम सरोवरको जाय जो ऐसाकरै वह उत्तम साधकहै ॥ ४५॥ फिर लक्ष्मणकुण्डमें स्नानकरै तब

गंगासागरमें स्नानकरे इस रीतिसे स्नान करनेसे पापी मनुष्यभी लोकमें पूज्य होजाताहै ॥४६॥
और वह मनुष्य सम्पूर्ण सिद्धियोंको प्राप्त होताहै और उसके और उसका सर्व पाप नाश हो

रत्नसागरमागत्य कौण्डिन्यस्य सरोव्रजेत् ॥ अङ्गरागाभिधन्तीर्थं गत्वावैसा-
धकोत्तमः ॥४५॥ पुनर्लक्ष्मण कुण्डंतु गत्वागङ्गासरःपुनः स्नानादिकं विधायेत्थं
लोकपूज्योभवेन्नरः ॥ ४६ ॥ सर्वसिद्धिमवाप्नोति जनःप्रक्षीणकल्मषः ॥ तत्र-
स्थानां महाभाग प्रायश्चित्तमिदम्परम् ॥४७॥ तत्राप्यशक्तश्चेत्कश्चि द्दिधातुंधर्म
साधनम् ॥ सहायम्वैयथाशक्तिः कुर्य्याद्वामार्गशोधनम् ॥४८॥ परिक्रमावतांपुण्यं

हेमहाभाग मिथिलापुरी की जात्रा सम्पूर्णपापोंका परम प्रायश्चित्तहै अर्थात् विशेष शो-
धनहै ॥४७॥ और जोमनुष्य इसपरिक्रमा को करनेमें भी असमर्थहो वहधर्मसालाबनवादेवै
और जोयभीनहोसके तो परिक्रमाकरनेवालेको राहखरचदेवै अथवा रास्ता दुरुस्तकरादेवै ॥४८॥

जोमनुष्य ऐसाकरताहै उसकोभी परिक्रमा करनेवाले के समान पुन्यहोताहै इसमें संदेहनहींहै ॥४९॥ ❀ इति श्रीवृहद्विष्णुपुराणे मिथिलामाहात्म्ये पञ्चदशमोऽध्यायः ॥१५॥३॥

सोप्यवाप्नोत्यसंशयम् ॥ माहात्म्य श्रवणञ्चैव मुच्यते कोटिकिल्बिषैः ॥४९॥

इति श्रीवृहद्विष्णुपुराणे पराशरमैत्रेय सम्वादे तृतीयोऽध्यायः ॥३॥

पराशरउवाच ॥ कोशलेन्द्रसरःस्नायात् मार्गमासेविशेषतः । मार्गेवैमंडनं तीर्थपादप्रक्षालनंसरः ॥१॥ रामलक्ष्मणसीतायाः सरांसिफलदानिवै ॥ पौषेऋ-

दो० ॥ माससमासतिथि सरितसर भाष्यो तोहिस्नान ॥ रामायण लहि पुन्यतें यारिम अध्याजान ॥४॥ फिर पराशरजी बोले कि हेमुनि ! दसरथसरोवर और मण्डनसरोवर और पगधोवन सरोवर का स्नान अगहन महीनेमें विशेष फलदायक है ॥ १ ॥ और फल का देनेवाला राम सरोवर और लक्ष्मण सरोवर और सीतासरोवर काभी स्नान अगहन महीनेमें करना

चाहिये और पूष महीनेमें ऋक्षसरोवर का स्नानकरे और पूषकी पूर्णिमासी को इसका स्नान विशेष फलदहै ॥२॥ और माघ शुक्ल पञ्चमी शोभन नाम योगमें पुरन्दर सरमें स्नानकरै और फालगुनपूर्णिमाको अग्नि कुण्डमे स्नानकरनेसे महाफल होताहै ॥ ३ ॥ और चैत्रशुक्ल नवमीको

क्षसरःस्नायात् पौर्णिमायांविशेषतः ॥२॥ पुरंदरसरोमाघे पञ्चम्यांशोभने शुभे ॥ फाल्गुन्यांपौर्णिमायांच वन्हिकुण्डं महत्फलम् ॥ ३ ॥ चैत्रशुक्लनवम्यांतु स्नायाद्रैरत्नसागरे ॥ धौतपापातुवैशाखे तृतीयायांमहाफलम् ॥ ४ ॥ जेष्टशुक्ल दशम्यांतु गंगातीर्थेविशिष्यते ॥ आषाढस्यपूर्णिमांतु दीर्घिकायांविशेष-

रत्नसागरमें स्नानकरै और वैशाख शुक्ल तृतीयाको धुतपापामें स्नानकरै तो महाफल प्राप्तहो ४ और जेठशुक्ल दशमीको गंगासागर में स्नानकरै और आषाढ़की पूर्णिमासी को दीर्घिकामें विशेष करके स्नान करनाचाहिये ॥ ५ ॥ और श्रावणकी अमावास्याको वलिराम सरोवरमें और भादो

शुक्ल पञ्चमीको भार्गवसरोवरमें स्नान करने का महाफलहै ॥६॥ आश्विनमासमें अमृतकूण्डमे
और कार्त्तिक मासमें पयस्विनी सरोवरमें स्नान करनेमे सर्वपाप नाश होजाते हैं ॥७॥ इस प्रकार
वर्ष दिनतक पर्व्व २ में जो ऊपर कह आयेहैं स्नान करनेसे महा फल होताहै और विशेष करके

तः ॥५॥ श्रावणेहलरामस्य तीर्थपुण्यमथांतिमे भाद्रेमहर्षिपञ्चम्यां स्नातव्यं
भार्गवंसरः ॥ ६ ॥ आश्विनेमृतकुण्डस्य स्नानंसर्वाघनाशनम् कार्तिकेतु
चतुर्दस्यां स्नातव्यावैतपस्विनी ॥७॥ एवंसाम्वत्सरीयात्रा कालेकालेमहत्फलम्
विशेषेणमहाभाग नवम्यांरामजन्मनि ॥ ८ ॥ जानकीजन्मवारेवा विवाहेपि
तथैवच ॥ सर्वेषांस्नानदानादि महापुण्यफलप्रदं ॥ ९ ॥ कौशिकीमाधवेस्नाया

रामनवमीको औरभी अधिक फलहै ॥८॥ और श्रीजानकीजीकेजन्मदिन जो वैशाखशुक्ल नवमी
को होताहै उसदिन सब सरोवरोंका स्नान और दान महा पुण्य और फल का देनेवालाहै ॥९॥ और

वैशाखमें कौशिकी और माघमें कमला और अगहनमें दुग्धवती और वेलवती और कार्त्तिकमें जमुना स्नान करना चाहिए ॥१०॥ और आश्विनमें भूयसी और गैरिका और भादोमें जलाधिक और जेठमें व्याघ्रवतीमें स्नान करना विशेष फलदायकहै ॥११॥ श्रावणमें विरजा और फाल्गुनमें

न्माघेवैकमलान्तथा ॥ दुग्धाविल्ववतीमार्गे कार्त्तिके यमुनान्तथा ॥१०॥ भूयसी गैरिकाचैव माश्विनेफलदामता ॥ भाद्रेजलाधिकापुण्या जेष्ठेव्याघ्रमती तथा ॥११॥ विरजाश्रावणेपुण्या मण्डनाफाल्गुनेमता ॥ इक्षुमतीतथापौषे चैत्रे वैलक्ष्मणाशुभा ॥१२॥ वाग्मतीफाल्गुनेशस्ता गण्डकीकार्त्तिकेमता ॥ मलमासे विशेषेण गैरिकाफलदायिनी ॥ १३ ॥ चन्द्रसूर्य्योपरागेषु सर्वानद्यशुभावहाः ॥

मण्डना और पूसमें इक्षावती और चैत्रमें लक्ष्मणामें स्नान करनेमे वड़ा पुण्य होताहै ॥ १२ ॥ फाल्गुनमें वाग्वती का और कार्त्तिकमें गण्डकी का और मलमासमें गैरिका का स्नान विशेष

फल देनेवालाहै ॥ १३ ॥ चन्द्रग्रहण और सूर्यग्रहणमें विशेषकरके इन नदियोंमें स्नान करनेसे पुण्य होताहै चाहे कोइ कामनायुक्त स्नान करै चाहे निष्काम ॥ १४ ॥ सरोवर और पुष्करणी अगहन महीनेमें विशेष पुण्या होकर फलदायकहै इसीप्रकार चैत्रशुक्ल नवमी और वैशाखशुक्ल

निष्कामानांविशेषेण नियमोनात्रविद्यते ॥१४॥ सरांसिपुष्करिण्यश्च मार्गशीर्षे विशेषतः ॥ चैत्रेवास्नानतःपुण्या नवम्यांमाधवेतथा ॥१५॥ विशेषेणमहाभाग स्नातव्यापञ्चपर्वसु ॥ पुण्ययोगेषुसर्वेषु नात्रकार्याविचारणा ॥ १६ ॥ नवरात्रे द्वयदेव्यः पूजनीयाःप्रयत्नतः ॥ सर्वेशिवाधिवासाश्च फाल्गुनेशाम्भवेतिथौ १७

नवमीमेंभी स्नान उन नदियोंका फलदायक होताहै ॥१५॥ हे महाभाग ! पांचो पर्व अर्थात् पूर्णिमा १ अमावास्या २ षष्ठी ३ अष्टमी ४ चतुर्दशी ५ और सब पुण्य योगमेंभी विना विचार स्नान करना चाहिये ॥ १६॥ और दोनों नवरात्रीमें यत्नपूर्वक देवीजीकी पूजा और फाल्गुन

कृष्न चतुर्दशीमें शिवजीकी पूजा करना चाहिये ॥ १७ ॥ इस प्रकार यह यात्रा मिथिलादेश वासी लोगोंके वास्ते मैंने वर्णन कियाहै और जोलोग दूरदेशमें बसते हैं उनकेवास्ते कालका नियम नहींहै ॥ १८ ॥ मिथिलामें वास करके मनुष्य जीवनमुक्त होजाताहै और शरीर त्याग

एवंयात्राक्रमःप्रोक्तो मिथिलावासिनांमुने ॥ न कालनियमस्तेषां येप्राप्ताद्दूरदेशतः ॥१८॥ मिथिलावासमासाद्य जीवन्मुक्तोभवेन्नरः ॥ देहान्तेराघवंप्राप्य तद्भक्तैःसहमोदते ॥१९॥ स्नानंदानंतपोहोमो देवतार्चनवन्दनम् ॥ इष्टपूजादिकंसर्वं मिथिलायांमहाफलम् ॥२०॥ विशेषेणप्रतिष्ठायाः फलम्वक्तुंनशक्यते ॥ निर्माय

करनेपर श्रीरामचन्द्रजी के पास पहुचकर उनके भक्तोंके साथ आनन्द करताहै ॥१९॥ मिथिला में स्नान और दान और जप और होम और देवताओंका पूजन और वंदन और इष्टापूर्त्ति अर्थात् मूर्त्ति प्रतिष्ठा और जलाशय करण अर्थात् कूप सरोवर इत्यादि बनवाने का अत्यन्त फल

होताहै ॥२०॥ प्रतिष्ठोंका फल मैं विशेष पूर्वक नहीं कहसक्ताहूं जो कोइ मिथिलामे मंदिर वनवा
कर उसमें भगवानकी प्रतिमा स्थापन करताहै ॥२१॥ वह सम्पूर्ण सञ्चित पाप अर्थात् कितने
जन्मके इकट्ठाहुआ पाप और प्रारब्ध कृत पापोंसे छूट जीवनमुक्त होकर भगवानमें मिलजाता

सौधशिखरं यत्नेनस्थाप्यतेहरिः ॥ २१ ॥ समुक्तःसञ्चितैःपापैः प्रारब्धैश्च विशे
षतः ॥ जीवन्मुक्तस्तमोभूत्वा हरेःसायुज्यमाप्नुयात् ॥२२॥ योयोयांयांतनुंभक्त
स्तत्तदुद्दिश्यदैवतम् ॥ संस्थाप्यप्रतिमांपुण्यां तेषांलोकान्सगच्छति ॥२३॥ सर्व
साधनजातेभ्यःप्रतिष्ठातुमहाफला॥ मिथिलायांविशेषेण धर्मसारमिदंमतम् २४

है ॥ २२ ॥ जो मनुष्य जिस देवताका उपासना रखताहै वह उसी देवताका उद्देश्यकर स्थापना
करनेसे उसी देवलोकमें प्राप्त होताहै ॥२३॥ सम्पूर्ण साधनसे देवमूर्तिका स्थापन करना अधिक
फलदायक है और मिथिलामें स्थापना करना विशेष करके धर्म्मोंका सार जानना चाहिये ॥२४॥

इति श्रीबृहद्विष्णुपुराणेमिथिलामाहात्म्ये पराशरमैत्रेयसम्वादे चतुर्थोऽध्यायः ४

इति श्रीबृहद्विष्णुपुराणे षोडशोऽध्याय ॥ १६ ॥ ४ ॥ ❀ ❀

मैत्रेयउवाच ॥ यएषमिथिलामध्ये पिनाकःपरिदृश्यते ॥ तस्यागमःप्रभावो वा यद्यज्जानासिसंशम ॥१॥ श्रीपराशरउवाच ॥ सम्यक्पृष्टंत्वयाब्रह्मन् यदेतच्छाम्भवंधनुः ॥ तस्यप्रभावोधर्मज्ञैर्विज्ञातोब्रह्मलौकिकैः ॥ २ ॥ पुरासुराणांश्रो-

दोहा । रामेश्वरमम धनुषकहि दरशनमे अघ जाइ । रामायण त्रिपुरावधन पांचमअध्यागाइ ॥

फिर मैत्रेयजी ने पूंछा कि हे मुनि ! मिथिलामें जो धनुष देखतेहैं उसका आगमन और प्रभाव जो जो आप जानतेहैं वह मुझसे वर्णन कीजिये ॥१॥ पराशरजी कहते हैं कि हे मुनि ! यह जो श्रीमहादेवजीका धनुष मिथिलापुरी में है उसका वृत्तान्त जो तुमने पूछा सो प्रश्न ठीक है इस धनुष का प्रभाव धर्म्मात्मा लोग और वेदके जाननेवाले सब जानते हैं ॥२॥ पूर्वकालमे

देवताओंका पराजय करनेके वास्ते मय नाम दानवने तीन पुरी निर्माण किया और उस पुरीमें राक्षसोंहीं को वसाया उन सम्पूर्ण राक्षसों से सब देवता लोग जब पराजय होगए ॥ ३ ॥ तब उस त्रिपुर राक्षसों के नास करने के वास्ते ब्रह्माजीकी आज्ञासे विश्वकर्मा ने इस धनुष रत्नको नि-

भार्थं त्रिपुरम्मयनिर्मितम् ॥ यत्रस्थैर्दानवैर्देवा देवलोकपराजिताः ॥३॥ तदा ब्रह्माज्ञयादेवैर्विश्वकर्माप्रचोदितः ॥ सुनिर्मायधनूरत्नं शङ्करायन्यवेदयत् ॥४॥ तेनैवधनुषारुद्रो ददाहत्रिपुरंरुषा ॥ पुनःप्रसन्नोभगवान् देवरातस्यभक्तितः ॥५॥ न्यासभूतमिदन्तत्र स्थापितंहिपरंधनुः ॥ तदाप्रभृतितद्वंश्यैः पूजितम्परमं

र्म्माण करके महादेवजीको दिया ॥ ४ ॥ उसी धनुषसे महादेवजीने उन तीनों पुरको भस्मकिया फिर देवरात अर्थात् जनकजीकी सेवापर प्रसन्न होकर भगवान् महादेवजीने ॥५॥ उस धनुषको अपना दूसरा शरीर जानकर मिथिलापुरीमें स्थापन करदिया उस दिनसे सब जनकवंशी उस

धनुषको महादेवजी का शरीर जानकर पूजा करनेलगे ॥६॥ हे मुनि इस पराक्रम से उस धनुष को जिसे विश्वकर्माने बनायाथा जनकजीने प्राप्त किया और उसका पूजन करते थे वह धनुष सर्व पापोंके नाश करनेमें समर्थ हैं ॥७॥ फिर जब महाराज शिरध्वज अर्थात् जनकजीके जग

धनुः ॥६॥ परम्परात्क्रमात्प्राप्तं जनकस्यमहात्मनः ॥ तेनसम्पूजितम्ब्रह्मन् धनुःसर्वाघनाशनम् ॥७॥ तस्यात्मजासमुत्पन्ना जानकीलोकविश्रुता ॥ तस्याः स्वयम्वरेशुल्कं धनुरेतत्सुनिश्चितम् ॥८॥ कैश्चिन्नचालितन्तच्च स्थानाद्गुरुतरं धनुः ॥ महादेवप्रभावाच्च स्वशक्त्यागौरवेणच ॥९॥ कौशिकेनसहायातो रामो

विदित श्रीजानकीजी नाम पुत्री उत्पन्न हुई तब उनके स्वयम्बरमें जनकजीने यही प्रण किया कि जोकोइ इस धनुष को तोड़ेगा उसीको मैं यह कन्या दूंगा ॥८॥ परन्तु कोइ इस धनुषको इस स्थानसे टारभी न सका क्योंकि वह धनुष महादेवजी के प्रभावसे और अपनी शक्ति कर

के अत्यन्त भारी था ॥९॥ तहांपर विश्वामित्रजी के साथ श्रीदशरथजी के पुत्र श्रीरामचन्द्रजी आए ॥१०॥ और उन्होंने उस महा भयानक धनुषको उठाया और खींचकर बीचसे तोड़डाला जिसका शब्द तीनों लोकमें फैलगया ॥११॥ यह जो महादेवजी का धनुष दधीचिके अस्थिसे

दशरथात्मजः ॥ दिदृच्छया पिनाकस्य यज्ञवाटमुपागमत् ॥१०॥ तेनचोत्थापितं संज्यं विकृष्यगुरुसारवत् ॥ मध्येभग्नंधनुर्भीम मितिलोकेषुविश्रुतम् ॥११॥ तदेतच्छाम्भवंदिव्यं विश्वकर्मविनिर्मितम् ॥ दधिच्यस्थिभवञ्चापं विख्यातं भुवनत्रये ॥१२॥ श्रीरामस्यकरस्पृष्टं धनुःखण्डस्यदर्शनम् ॥ सर्वाघौघहरंपुसां

उत्पन्न तीनों लोकमें विख्यात विश्वकर्मा के हाथका बनायाहुआ अत्यन्त दिव्य और ॥१२॥ श्रीरामचन्द्रजी के हाथका छूआहुआहै इस धनुष खण्डका दरशन सब पापोंके नाश करनेमें समर्थ हैं ॥१३॥ जिस किसीको महापाप नाश करने की इच्छाहो वह रामेश्वर लिंग का दर्शन

करै नहींतो धनुषखण्ड का दरसन करै ॥१४॥ और हेमहाभाग जो मनुष्य कलियुग में रामे
श्वरलिङ्ग और धनुषका दर्शनकरतेहै उनको सवदेवता लोग प्रणाम करतेहै और वह जीवन

सर्वकल्मषमार्जनं ॥ १३ ॥ यथारामेश्वरंलिगं धनुषोदर्शनन्तथा ॥ अतिपातक
जातानां शोधनंद्वितयम्मतम् ॥१४॥ कलौयेनमहाभाग कृतायात्रामहामुने ॥
अमरास्तन्नमस्यन्ति जीवन्मुक्ततमोहिसः ॥१५॥ परलोकभयाद्भीतास्तन्नमस्य
न्ति येनराः ॥ तेपिपापैर्विमुच्यन्ते प्रयान्तिशुभगांगतिम् ॥१६॥ मनुष्यदेहमा-
साद्य येनरामेश्वरङ्गताः ॥ तेपापिष्ठतमालोके देवताक्लेशभाजनम् ॥१७॥ आल-

मुक्त होजातेहै ॥१५॥ और जोमनुष्य महा पापोंके कारण परलोक से डरकर इन दोनोको
प्रणाम करते है वहभी सव पापोंसे छूटकर शुभगतिको प्राप्तहोतेहै ॥१६॥ जिस किसीने मनुष्य
का शरीर पाकर रामेश्वरमहादेव का दर्शन नकिया वह मनुष्य अत्यन्त पापी है और देवनि-

न्दककी गतिपाताहै १७ हेमुनि जिसकी मोने आलस्य ॥ करकेअथवा दूरदेश समझकर सेतुवन्ध
रामेश्वर का दरशन नकिया १८उसके इस महापापका।प्रायश्चित्त यह है॥ कि मिथिलामें जाकर धनुष
का दर्शनकरै इससे उसके सव पाप नास हो जायगे १९ जो कि धनुष के दर्शनमात्रसे संपूर्णपाप नाश

स्याद्दूरदेशस्था येनयान्तिमहामुने ॥ दृष्टं वैवालुकंलिङ्गं सेतुबन्धासिरःस्थितम् ॥
॥१८॥ प्रायश्चित्तम्भवेत्तेषां घोरपापविशोधनम् ॥ मिथिलायांसमागम्य यद्दृष्टं
शाम्भवन्धनुः ॥ १९ ॥ पापापनोदनन्तेषां जायतेतस्यदर्शनात ॥ तस्मात्सर्व
प्रयत्नेन धनुर्यात्रांसमारभेत् ॥ २० ॥ येनदृष्टंधनुःखण्डं सर्वपापापनोदनम् ॥
श्रीरामस्यकरस्पृष्टं साक्षात्भुवनपावनम् ॥ २१ ॥ प्रत्यक्षंज्ञापकंश्रेष्ठं धनुर्वीर्य्यं

होजातेहैं इसलिये धनुष यात्रा अवस्य करनाचाहिये॥२०॥जोमनुष धनुषखंड का दर्शनकरते हैं वह
तीनो लोक के पवित्र करने में समर्थ है॥२१॥ प्रत्यक्ष उत्तम उपदेशकारक और संपूर्णऐश्वर्य्य

प्रकाशक यह धनुषहै स्टष्टिपर्य्यंत इस पृथ्वीमण्डल में अचलहोकर रहैगा ॥२२॥ महावैष्णवसं-
स्कार और वड़े वड़े यज्ञादिक वहुतेरे पुण्यकरनेसे इस धनुषका दर्शन मिलताहै ॥२३॥ यह

प्रकाशनम् ॥ असृष्टिनिश्चलंदिव्यं स्थास्यत्यवनिमण्डले ॥२२॥ महावैष्णवसं-
स्कारै र्महा यज्ञव्रतादिभिः॥ महापुण्यातिरेकैश्च धनुषोदर्शनम्भवेत् ॥२३॥ एतद्र
हस्यंसर्वस्वं सर्वब्रह्मर्षिसंमतम् ॥ पुराणज्ञैश्च निर्णीतं यद्रामाभिमुखोभवेत् ॥२४॥
इति श्रीवृहद्विष्णुपुराणे मिथिलामाहात्म्ये पराशरमैत्रेयसम्वादे पंचमोऽध्यायः५
मैत्रेय उवाच ॥ मिथिला निमिवंश्यानां राजधानीति मे श्रुतं ॥ सा कथं पुण्य-

रहस्य सब ब्रह्मर्षिलोगों की सम्मतिहै और पौराणिकों से निर्णीतहै इससे श्रीरामचन्द्रजी
अवश्य अभिमुख अर्थात् सानुकुलहोतेहैं ॥२४॥ ❀ इति श्री बृहद्विष्णुपुराणे मिथिलामहात्मये
सप्तदशोध्यायः ॥१७॥५॥

दोहा। निमिराजातपतीर्थअरु जनकवंशकी रीति षटअध्यायनारदमिलन रामायणकहिंप्रीति।६।
फिर मैत्रेयजीने पूछा कि हे मुनि मिथिलाके निमिवंशियोंकी राजधानी आपने वर्णन कियाहै फिर
इसको पुण्य तीर्थमें भी गिनाहै इसका कारण बतलाइये ॥ १ ॥ पराशरजी बोले हे मुनि जहां २
तीर्थेषु गण्यते तद्वदाधुना ॥१॥ पराशर उवाच ॥ हरेराराधनं लोके यत्रयत्रजनैः
कृतम् ॥ तदेवतीर्थंविज्ञेयं दर्शनात्पुण्यदंनृणाम् ॥२॥ इयन्तुमिथिलापुण्या स्वयं
रामस्वरूपिणी ॥ न सापेक्षान्यसंस्कारैर्न सापेक्षा सुरालयैः ॥ ३ ॥ परन्तुमुनि
भिःपूर्वं कांचनारण्यवासिभिः ॥ हरेराराधनंपुण्यं बहुधातत्रवैकृतम् ॥४॥ वैव-
भक्तलोगोंने हरि का आराधन कियाहै तहां२ की भूमि मनुष्योंको दर्शनसे पुण्य देतीहै इस वास्ते
उस स्थानको तीर्थ कहाहै ॥ २ ॥ और यह मिथिला तो आपही पुण्या और श्रीराम स्वरूपिणी
हैं इसको किसी दूसरे संस्कार या किसी देवालय की कुछ इच्छा नहीं ॥ ३ ॥ परन्तु पूर्वकालमें

काञ्चन आरण्य के वासी मुनिलोगोंने यहांपर भगवानका आराधन बहुत तरहसे कियाथा ॥४॥ वैवस्वत मनुके वंशमें इक्ष्वाकु नाम राजाके पुत्र निमिने गौतमजीको पुरोहित करके यहां यज्ञ किया ॥५॥ तब वशिष्ठजीने निमिको और निमिन वशिष्ठजीको शाप दिया जिससे दोनों मृतक

स्वतमनोर्वंश इक्ष्वाकोस्तनयोनृपः॥ गौतमंयाज्ञ्यवल्क्यंच यज्ञमंत्रैरथाकरोत्॥५॥
वशिष्ठेनतुसंशप्तो वशिष्ठञ्चापि सोऽशपत् ॥ विदेहत्वंद्वयोरासीत्पुराणेषु कथा
स्फुटा ॥ ६ ॥ पुनर्निमेश्शरीरस्य मन्थनंमुनिभिःकृतम् ॥ मिथिस्तत्रसमुत्पन्नो-
मिथिलातनसाऽभवत् ॥७॥ तदाप्रभृत्तितद्वंश्यैः राजधानीनिरूपिता॥ राजानस्तु

होगये यह कथा पुराणमें कथितहै ॥६॥ फिर मुनियोंने निमि के उस मृतक शरीरको मथनकिया तो मिथिनाम राजा उत्पन्न हुआ इसीसे इस देशका नाम मिथिला प्रसिद्धहुआ ॥७॥ उस दिनसे मिथि के वंशमें राजधानी चलीआती है इसमें बड़े२ भाग्यवान् पुण्यात्मा राजालोग हुए और

गृहस्थ कर्ममें लीन होतभये ॥ ८ ॥ परन्तु सबकोई तपस्या और योगमें मुनियों के समान हुए और संसारी विषयोंसे निर्लेप रहतेथे जैसे कमलपत्र जलमें रहकर उससे निर्लेप रहताहै ॥ ९ ॥ उसी वंशमें ज्ञान विज्ञान का सार जानने वाले और भजनानन्द के लक्षण संयुक्त राजाओंमें रत्न

महाभाग दर्शनगृहमेधिनः ॥ ८ ॥ परन्तुमुनिभिस्तुल्यास्तपोयोगसमाधिभिः ॥ निर्लेपामायिकैर्भावैः पद्मपत्रमिवाम्भसा ॥९॥ ज्ञानविज्ञानसारज्ञाः भजनानंद लक्षणाः ॥ विशेषतोराजरत्नं जनकोनामनामतः ॥ १० ॥ जानकीयत्रचोत्पन्ना निमिवंशप्रकाशिनी ॥ यस्याभक्तिप्रभावेण रामोदाशरथिःप्रभुः ॥ ११ ॥ जामातृ-

राजा श्रीरध्वज जनकहुए ॥ १० ॥ निमिके वंशको प्रकाश करनेवाली जानकीजी जहां प्रगटहुई और जिस राजा जनकके भक्तिके प्रभावसे दशरथात्मज श्रीरामचन्द्रजी ॥११॥ लोकोत्तर अर्थात् स्वर्गादि लोकसे ऊपर फलको देनेवाले जामात् अर्थात् दामाद हुए उन्हीं राजा जनक की यह

नगरी अत्यन्त पुण्य है ॥१२॥ और श्रीजानकीजीके यहांपर जन्म होनेसे यह मिथिला पुरी विशेष तीनो लोक में प्रसिद्ध हुई ॥१३॥ मैत्रेयजीने फिरपूछा किहे मुनि जनकजीके हलकेशि

त्त्वं समापन्नो लोकोत्तरफलप्रदः ॥ तस्ययंनगरीपुण्या तत्र जाता महाफला ॥ तस्यांनिवासिनां पुण्यं मयावक्तुंनशक्यते ।१२॥ विख्याताजानकीजन्म हि शेषेणाभवन्मुने ॥ मैत्रेय उवाच ॥ कथं सीतासमुत्पन्ना तस्यलाङ्गलपद्धतौ ॥१३॥ कस्यपुण्यातिरेकेण तदीयातनयाभवत् ॥ पराशर उवाच ॥ जनकानांकुले ब्रह्मन् महर्षिसमतेजसां ॥ १४ ॥ मर्यादयासमापन्नं सर्वलोकेषुविश्रुतम् ॥ ज्ञान

रा चलाने में जानकीजी किसप्रकार प्रगटहुई और कौनपुण्य जनकजी महाराज का ऐसा था की जिसकरके जानकीजी उनकी कन्याहुई ॥१४॥ पराशरजी बोले हे ब्रह्मन् इसमिथिला-पुरी में जितने राजा हुये वहसब ऋषियों के समान तेजस्वी और बड़े मर्य्यादावान् तीनों लोक

में विख्यात थे मानो इनका कुल ऐसाही था ॥१५॥ उसीकुल में ज्ञान और विज्ञानसे सम्पन्न
और आधि व्याधि से वर्जित और विशेष करके तीनोंलोक में विख्यात प्रतापी राजा ह्रस्व

विज्ञानसंपन्नं आधिव्याधिविवर्जितम् ॥१५॥ ह्रस्वरोमाविशेषेण लोकविख्यात
पौरुषम् ॥ तस्यपुत्रद्वयंचासीज्ज्येष्ठःशीरध्वजोमतः ॥१६॥ तद्गुणैःसमतांजा-
तौ द्वितीयस्तुकुशध्वजः ॥ सर्वेतद्वंशजाभूपाः ख्याताजनकनामतः ॥१७॥ तेना
सौ सर्वलोकेषु विख्यातोजनकाभिधः ॥ पितर्य्युपरते राज्ये स्थापितोजनकाधि
पः ॥१८॥ ज्येष्ठःशीरध्वजोराजा गुणानामाकरोमहान् ॥ धर्मेणपालयद्राज्यम-

लोमा नाम जनक हुए ॥१६॥ उन्हीराजा ह्रस्वलोमा के दो पुत्रहुए बड़े का नाम शीरध्वज
और छोटे का नाम कुशध्वज ॥१७॥ और उसवंश में जो लोग राजा होते थे वह सब जन-
क कहलाते थे इसलिये जनकही नाम तीनों लोक जानताहै ॥१८॥ अपने पिता के परलोक

होजानेपर वही ज्येष्ठ शीरध्वज राज्यगद्दी पर बैठ कर और जनक पदवी पाकर संपूर्ण गुणों के खान हुए ॥१९॥ वह राजा शीरध्वज जनक धर्म्म पूर्व्वक प्रजापालन करके और अधर्म्म को छोड़ कर विशेष मिथिलापुरी का राज्य करतेभये उनके धर्म्मके प्रभाव से निहतवैरी

धर्मान्परिवर्जयन् ॥ १९ ॥ सशासमिथिलायां वै राज्यंनिहतकण्टकम् ॥ स्वयं प्रादुरभूद्धर्माद्रत्न स्वर्णाकरानिर्गिरैः ॥२०॥ धनधान्यवतीस्फीता भूमिः कामदुघा बभौ ईजेबहुविधैर्यज्ञै देवतातुष्टिकारकैः ॥२१॥ ब्राह्मणांस्तोषयामास दानसन्मान भक्तिनः ॥ तस्मिन्नशासतिधर्मेण राज्यंनिहतकण्टकम् ॥२२॥ अनावृष्टिःसमा

अकण्टक राजरहा ॥२०॥ उनके धर्म्म के प्रभावसे रत्न और सुवर्णकी खान पर्व्वतों में बहुत उत्पन्नहुईं और अतिधनधान्य से पृथ्वी कामधेनु के समान होगई ॥२१॥ और राजा शीरध्वज-ने देवताओं के सतुष्ट करने केवास्ते यज्ञ और पूजन बहुताकिया और ब्राह्मणों कोभी भक्ति

युक्त दान मानसे संतुष्ट किया ॥२२॥ इसप्रकार निःकण्टक राजकरतेहुए कितनेदिनोंके वाद एकसमय अवर्षण होगया जिसकेकारण प्रजालोग बहुत पीड़ितहुऐ ॥२३॥ तब राजा शीरध्वज ने ऋषियोंकी आज्ञा पाकर वैशाख सुदिनवमि तिथिको यज्ञकिया और सोनेका हल लेकर

पन्ना तयासंपीडिताःप्रजाः ॥ महर्षिभिःसमादिष्टो मार्गेणमिथिलाधिपः ॥२३॥ माधवेधवलेपक्षे नवम्यांयज्ञमारभत् ॥ स्वर्णलांगलमादाय विचकर्षमहीतलं ॥२४॥ तत्रपुत्रीसमुत्पन्ना तां तदागृहमानयत्। जानकी तेन वैनाम्ना विख्याता भुवनत्रये ॥२५॥ कदाचिन्नारदोयोगी तत्रागत्य महामुने ॥ सीतेतिनाम्नाचा-

जब पृथ्वी को जोतने लगे ॥२४॥ तो उसी स्थानमें उसी सीरवर से एक कन्याउत्पन हुई उसको अपनी कन्या समझ कर अपने घरलेआये जोकि राजा जनक उस कन्या को लेआए म वास्ते वह कन्या जानकी नाम से तीनों लोक मे विख्यातहुई ॥२५॥ फिर कुछ काल

वितेनपर नारद योगी महामुनि वहां आए और श्रीजानकी का सीताजी नाम रखकर फिर राजा जनकजी को एकान्त में लेजाकर आगे की होनेवाली सबबात कहनेलगे ॥२६॥ कि हे महाराज ! तुह्मारे कुल के प्रकाश करनेवाली यह कन्या है । सीता नाम कर के

भाष्य रहस्यतदुपादिशत् ॥ २६ ॥ श्रीनारद उवाच ॥ इयंपुत्रीमहाभागा कुल·द्योतकरीतव ॥ सीतेतिनाम्नीविख्याता भविष्यतिजगत्त्रये ॥२७॥ अस्याभर्त्ता प्रभुस्साक्षात्परमात्मा भविष्यति ॥ एतदर्थंहिभवता कर्त्तव्यंयत्नमुत्तमम् ॥२८॥ स्वयम्वरेप्रकर्त्तव्यं धनुरुत्थापनंपणम् ॥ नान्यतश्चालितञ्चापं परमात्पुरुषा-

यह कन्या तीनो लोक में विख्यात होगी ॥ २७ ॥ और इस कन्याके स्वामी अर्थात् पति साक्षात् परमात्मापुरुष होगें इसवास्ते आपको उससमय उत्म यत्न करना होगा ॥२८॥ इसके स्वयम्वर में धनुष उठानेका प्रण करना क्योंकि शिवाय परमेश्वर के और कोइ

इसधनुष को टारभी न सकैगा ॥२९॥ हे राजन्! उनसे सम्बन्ध होनेसे तुह्मारी संपूर्ण कामना
पूरी होगी। और यहकन्या तुम्हारी अर्थ धर्म काममोक्ष चारो पदार्थ को देनेवाली है ॥ ३० ॥
जो मनुष्य किसी विपत्तिमें पडकर इनकी शरनमें आताहै उसकी सब विपत्तियें नाश

हते ॥२९॥ तस्यसम्बन्धतोराजन्सर्वान्कामानवाप्स्यसि ॥ इयंत्वत्तनयाराजन्
चतुर्वर्गप्रदायिनी ॥ ३० ॥ आपन्नानांप्रपन्नानां सर्वापद्विनिवारिणी ॥ धन्योसि
कृतकृत्योसि लोकवन्द्योसि भूपते ॥३१॥ यत्त्वयातनयालब्धा ह्रीश्रीकीर्त्यादि
वन्दिता ॥ पराशर उवाच ॥ इत्युपादिश्यराजेन्द्रं ब्रह्मलोकञ्जगाम्मसः ॥ ३२ ॥

करदेती हैं हे राजन्! तुम धन्यहो और कृत कृतहो क्योंकि ॥ ३१ ॥ यह कन्या जिसको आपने
पायाहै ह्री लज्जा और श्रीलक्ष्मी और कीर्त्ति इत्यादिकों मे प्रणमनीयहै इतना कहकर नारदजी
ब्रह्मलोक को चलेगये ॥३२॥ पराशरजी कहतेहैं कि यह मिथिला पुरीकी रहस्य अर्थात् गोप्यकथा

आपकी प्रीतिपर मैंने वर्णन किया जोकोई इस कथाको सुनेगा अथवा सुनावेगा अथवा हृदयमें स्मरण करेगा ॥ ३३ ॥ उसके ऊपर श्री सीताजी साक्षात् रामजीकी परम प्रिया सदा अनुकूल

त्वत्प्रीत्यावर्णितंसर्वं रहस्यंमिथिलोद्भवम् ॥ यएतच्छ्रावयेन्नित्यं श्रुत्वावैहृदि धारयेत ॥ ३३ ॥ तस्यतुष्टाभवेत्सीता साक्षाद्राघववल्लभा ॥ एतदर्थंहिमिथिला सर्वकल्याणकारिका ॥३४॥ इति श्रीवृहद्विष्णुपुराणे मिथिलामाहात्म्ये पराशर मैत्रेय सव्वांदे षष्ठोऽध्यायः ॥ ६ ॥

मैत्रेय उवाच ॥ विचित्रमिदमाख्यानं वर्णितं भवतामुने ॥ वैशाखे जानकी

रहेंगी ॥ ३४ ॥ ❀ इतीश्री वृहद्विष्णुपुराणे मिथिलामाहात्म्ये अष्टादशोऽध्यायः ॥१८॥६॥❀

दोहा। जानकी जन्मनक्षत्रातिथि व्रतविधान जेहिरीति। सरणरमायण मानमें माधवनौमीमीति।

मैत्रयजीने फिर प्रश्न की हे मुनि आपने यह बहुतही आश्चर्य कथा सुनाई है परन्तु अब यह भी

कहसुनाइये कि वैशाषमें जानकी नवमी व्रत किसतरहसे कियाजाताहै ॥ १ ॥ उसका नियम और विधान और काल जो मुनीश्वर लोगोंने कहाहै और जिसप्रकार सिद्धान्त ग्रन्थोंमें वर्णित

जाता व्रतन्तत्र कथम्भवेत् ॥१॥ निर्णयस्तस्य कालस्य विधिश्चापि मुनीश्वर। यथा निर्णीयतेशास्त्रे सिद्धान्तं तस्य शंसमे ॥ २ ॥ श्रीपराशर उवाच ॥ वैशाखस्य सिते पक्षे नवमीमघ संयुता ॥ सैव मध्याह्न योगेन शस्यतेवृतकर्मणि ॥३॥ विन्क्षापि तिथिर्ग्राह्या नवमीशब्द संग्रहात् ॥ तिथिक्षये तिथिर्वापि वृद्धौशुद्धाऽथवामुने ॥ ४ ॥ मध्याह्नव्यापिनीग्राह्या कर्मकालस्तुशस्यते ॥ पौरवशस्य ते

है वहसव मुझसे कहिये ॥ २ ॥ पराशरजी बोले कि वैशाष शुक्ल नवमी तिथी मघानक्षत्र जिस दिन मध्याह्न कालमेंहो उसी दिन वृत प्रसस्त अर्थात् उत्तमहै ॥ ३ ॥ यदि मघायुक्त नवमी नहो सिर्फ नवमीहीहोतो करनाचाहिये तिथिक्षयहो अथवा वृद्धहो अथवा सुद्धनौमी हो अथवा

दूसरी तिथियोंसे संयुक्त नवमीहो ॥ ४ ॥ मध्याह्न व्यापी अर्थात् दोपहरके समय नवमी जिस
दिनहो वह व्रतकाल प्रशस्तहै मध्याह्न व्यापीहोतो परदिन करना चाहिये ॥ ५ ॥ और जो ३०
परदिन अथवा पूर्वदिन मध्याह्न व्यापीनी नहो तौभी परदिन व्रतकरै क्योंकि पारन दशमीमें ७,
प्राज्ञे मध्याह्नेचेद्दिनद्वये ॥ ५ ॥ दिनद्वयेप्य तद्व्याप्तौ तदा संगृह्यतेपरा ॥ द-
शम्यां पारणं शस्तं दशमींनैव लंघयेत् ॥ ६ ॥ उपवासक्रमं राम नवम्यादिवदा
चरेत ॥ पुमान्स्त्रीगृहस्थश्च श्रद्धावांश्चेन्निजालये ॥ ७ ॥ निर्माय प्रतिमां श्रेष्ठां
तत्र पूजनमाचरेत् सौवर्णीराजतीं वापि प्रतिमां कारयेन्नरः ॥८॥ पलैः षोडश-
प्रशस्तहै दशमीमें लंघन न करना चाहिये ॥ ६ ॥ और जिसप्रकार रामनवमी में उपवास हो-
ताहै उसी क्रमसे पुण्यस्त्रीवानलोग उपवासकरैं और श्रद्धायुक्त अपनेघरमें ॥ ७ ॥ सुन्दर म- ६२,
ण्डप निर्माणकरके और उसमे सोना या चांदीकी नवीन मुर्त्तीबना स्थापितकर पुजनकरै ॥ ८ ॥

और षोडसपल अथवा पञ्चदसपलकी प्रतिमा बनवावै अथवा एककर्षकी अथवा एकमाषकीभी बनवावै पांचगुंजाका एकमाष होताहै और सोलह माषका एककर्ष होताहै और चारकर्षका एक पलहोताहै अर्थात् एकहजार चौविसमासा अथवा नौमे माठमासाकी प्रतिमा अथवा एक

भिः कार्य्या दशपंचभिरेवच ॥ तावद्भिः कर्षकैर्वापि तावन्माषैरथोपि वा ॥९॥
वित्तशाठ्यं न कुर्वीत सर्व धर्म्म क्रियादिषु ॥ ज्ञानमुद्राधरं रामं वीरासनसमा-
स्थितम् ॥१०॥ दिव्यसिंहासनासीनं न्यसेदष्टदलांबुजे ॥ श्रीरामवामभागस्थां
सीतां सर्वांग शोभनां ॥११॥ नीलपद्मधरां देवीं कारयेत्साधकोत्तमः ॥ लक्ष्मणं

कर्षकी अथवा एकमाषकी बनावै ॥ ९ ॥ धर्मक्रियादिकोंमें वित्तसाठ्य न करे अर्थात् खर्चका शोच न करे श्रीरामचंद्रजीकी ज्ञान मुद्रासंयुक्त वीरासनसे ॥ १० ॥ सुन्दर सिंहासन पर अष्टदल कमलके बीचमे श्रीरामचंद्रजीकी प्रतिमा को स्थापित करै और उनके वामभागमें सर्व्वाङ्गसुन्द

री श्रीसीताको स्थापित करे ॥ ११ ॥ जो नील कमल लियेहुये हैं और पश्चिमतरफ हाथोंमें छत्र चामर लियेहुए लक्ष्मणजीकी प्रतिमाको रक्खै ॥ १२ ॥ और दोनों पार्श्वमें पंखालीये हुये भरत और शत्रुहनजीकी प्रतिमा और सामने हनूमानजीकी प्रतिमा को स्थापित करै ॥ १३ ॥

पश्चिमेभागे धृतछत्रसुचामरम् ॥१२॥ पार्श्वे भरतशत्रुघ्नौ तालवृन्तकराम्बुजौ ॥ आञ्जनेयं तथैवाग्रे एवं वै प्रतिमाक्रमः ॥१३॥ पूजास्याद्वैष्णवपीठे वेदिकोपरि संस्थिते ॥ प्राणप्रतिष्ठामन्त्रैश्च न्यसेत्प्राणान्प्रयत्नतः ॥१४॥ संस्कारान्विधिवत्कृत्वा देवमावाह्य पूजयेत् ॥ आसनं स्वागतं पाद्यमर्घमाचमनीयकम् ॥१५॥

वेदीके ऊपर वैष्णवपीठमें पूजा कर प्राणप्रतिष्ठा मन्त्रसे यत्नपूर्वक प्राणप्रतिष्ठा करै ॥१४॥ संस्कार की विधिसे संस्कार करके देवताका आवाहन करके पूजन करै आसन और स्वागत और पाद्य और अर्घ और आचमन इत्यादि प्रकारसे ॥१५॥ तब गंध और पुष्प स्रग अर्थात्

माला धूप, दीप और नैवद्य ॥१६॥ और ताम्बूल इत्यादि से श्रीरामचन्द्रजी का पूजन करै इसी प्रकार जानकीजी कोभी पूजै और यज्ञोपवीत की जगह सीताजीको भूषण देवै ॥ १७ ॥ और

दो० । अन्नकृतअघकोटिनकलुषी मिथिलागतिदातार रामायण दसतीनिमें ब्रूहिनारदकरतार १३

मैत्रेयजी कहतेहैं हे महाराज मिथिलामें जो जीवमरताहै सो कहां जाता है सो सवविस्तार पूर्वक अनुग्रह करके कहिए ॥ १ ॥ श्रीपराशरजी वोले किसी कालमें विष्णुकी भक्ति मे

राद्ब्रूहि यदि ते मय्यनुग्रहः ॥ १ ॥ श्रीपराशर उवाच ॥ कदाचिदेकदासर्वे मुनयः साधुवादिनः ॥ विष्णुभक्तिरतास्ते वै लोकानां हितकाम्यया ॥ २ ॥ नैमिषारण्ये महातीर्थेगोष्ठीं चक्रुर्मनोरमाम् ॥ द्वादशाक्षरमन्त्रस्य मंत्रस्याष्टाक्षरस्य च ॥ ३ ॥ द्व्येकाक्षरादि मंत्राणं व्याख्यानार्थे स्थितास्तदा ॥ तत्रस्तेषु मुनिन्द्रेषु नारदस्तु तपोधनः ॥ ४ ॥ समागच्छन्महातीर्थे नैमिषाख्ये मुदान्वित ॥

आसक्त समदरशी लोकन हितकामना करिके ॥ २ ॥ सनक सनन्दन आदि ऋषि नैमिषारण्यतीर्थ में आकर वडीभारी सभाकी उस सभामें द्वादशाक्षर मन्त्रकी और अष्टाक्षर मन्त्रकी व्याख्या करनेलगे ॥ ३ ॥ उस कालमें वैठेहुए जो मुनीन्द्र लोग थे उन लोगोंके समीपमें दिव्य

दरशन नारदजी महाराज आए ॥ ४ ॥ उस नैमिषारण्य महा तीर्थमें जाज्वल्यमान धनकती हुई अग्निके समान तेजहै जिसको ॥ ५ ॥ और नारायण के गुणानुवाद को गायन कररहे हैं और जनार्दनको ध्यान कररहे हैं ऐसे नारद मुनिको देखकर सनकादिक मुनियोंने विधिवत् सत्कार

दृष्ट्वा मुनिं समायातं ज्वलदग्नी शिखोपमम् ॥ ५ ॥ गायमानं विष्णुव्रतं ध्यायमानं जनार्द्दनम् ॥ मुनिं सत्कारयामास सत्यव्रतपरायणम् ॥ ६ ॥ वाग्भिः स्तुत्वाऽभिनन्द्याथ हरिभक्तिपरायणम् ॥ लोकानामुपकारार्थं पप्रच्छुरिदमादरात् ॥ ७ ॥ ऋषय उवाच ॥ ब्रह्मन्केन प्रकारेण जन्मजन्मान्तरार्जितः ॥ पापराशिः ॥

किया ॥ ६ ॥ और स्तुतिसे नारदजीको प्रसन्नकर हरि भक्तिकी इच्छा करनेवाले जो सनकादि ऋषि वे आदर पूर्वक लोक के उपकारके लिये नारदजी से यहवात पूछी ॥ ७ ॥ हे ब्रह्मन् हे नारद जन्म जन्मार्जित जो पापका समूह उसका नाश किस भांति होगा यह पाप मुझको निश्च

यकर कहिये ॥८॥ नारदजी बोले हे ऋषि लोग हमने पहिले मोक्ष की इच्छा से इसीबातको ब्रह्मासे पूछाथा उनने उत्तरदिया वही पापको हरने वाली कथा आपसे कहताहूं ॥९॥ हे सर्वे

शिर्विनष्टःस्यात्तन्नोवद सुनिश्चितम् ॥ ८ ॥ श्रीनारद उवाच ॥ एवमेव मया पूर्वं ब्रह्मा लोक पितामह ॥ मोक्षेच्छया च संस्पृष्टस्तत्त्वज्ञोमे यथा ब्रवीत् ॥ ९ ॥ शृणुध्वं मुनयः सर्वे सर्वलोकहितेरताः ॥ तथैव कथयिष्यामि कथां पापहरां पराम् ॥ १० ॥ ब्रह्मन्केन प्रकारेण रामभक्तिविवर्जिताः ॥ अज्ञानिनोपि ये नैव प्राप्नुयुर्विष्णुमन्दिरम् ॥ ११ ॥ श्रीब्रह्मोवाच ॥ साधुपृष्टं त्वया पुत्र देवानामपि

मुनियेः सर्वलोक के हितम रत सुनिये हम यह कथा कहतेहैं जिसके सुनने से मनुष्य सब पातक से छुटताहै ॥ १० ॥ हे पितामह ज्ञान शास्त्रको न जानने वाला और भक्तिरहित जो मनुष्य है उस की गति किस भांति से होती है ॥११॥ नारद की यह बात सुनकर ब्रह्माजी

नारदजी से बोले हे पुत्र तुमने अच्छा पुछा जो तुमने पूछा वह देवताओं को दुर्लभ है वह
वात तुमसे कहते हैं जिसको जानने से पुरुष मुक्त होताहै ॥ १२ ॥ हे नारद जनकके कुलमें

दुर्लभः ॥ अहन्ते कथयिष्यामि येन मुक्तिरवाप्यते ॥१२॥ मिथिलोनामराजा
भूत्सत्यव्रत परायणः। विष्णुभक्तिरतोनित्यं सर्वशास्त्रविशारदः १३ जनकस्या-
पि स पूर्वो ज्ञानेन तु वृहस्पतिः॥ निमिना तेन नगरी राज्ञा तु मिथिलेन वै ।१४।
तस्मात् सा मिथिला नाम्नी वाराणस्यधिका कृता ॥ यत्रजातोमहाराज जन-
कश्चातिधार्मिकः ॥१५॥ तस्यापत्यं भवेत्सीता लोकेषु शुभदर्शना ॥ जगन्माते

ज्ञानमें वृहस्पतिके समान और सम्पूण शास्त्रोंको जाननेवाला विष्णुका भक्त और सत्यव्रतमें
परायणमिथि नाम राजा भया ॥१३॥ उस राजाने एक नगर वनवाया इसी लिये मिथिला इस
नामसे वह नगर प्रसिद्ध हुआ ॥१४॥ और पुण्य धर्म्मादि कर्म्म में काशीसेभी उत्तमहै जिस

मिथिला में बडाभारी धार्मिकराजा जनक उतपन्न हुएहै ।१५। जिसकी पुत्री संसारभरमें शुभ
दर्शना सीता उतपन्न हुईहै और वह तिनों लोकमें जगन्माता, इस नामसे भी विख्याता हैं ।
जिसको विवाह सूर्य्यवंसी श्री रामचन्द्रसे भयाहै रामचन्द्र साक्षात् विष्णुस्वरूपहै ॥१७॥ अ-
ति विख्याता त्रिषु लोकेषु विश्रुता ॥१६॥ सूर्यवंशभवेनैव श्रीरामेण विवाहिता ॥
रामोऽपि हि विमुक्तात्मा स्वयं नारायणः परः ॥ १७॥ कौशल्येयो दाशरथिर्भूत्वा
विष्णुरजायत ॥ क्षयाय राक्षसानां च देवानां च जयाय वै ॥१८॥ अवतारःकृत
स्तेन धर्ममार्गस्य रक्षणे ॥ आदिमाया स्वयं सीता रामा रामविधायिनी ॥१९॥
पने इच्छासे कौशल्याके पुत्र और दशरथके नन्दन हुएहैं श्री रामचन्द्रजीका अवतार राक्षसों
को विनास करने के लिये और देवताओं के विजय होनेके लिये ॥१८॥ और धर्म्मके रास्ता
को रक्षा वो प्रकाश करने के लिये हुआहै और सीता महारानी आदि मायाहैं वही श्री रामच-

न्द्रमे विवाहिताहैं रामके अनुविधान याने रामके अनुकूल विधान करनेवाली ॥ १९ ॥ सोइ सीता जनक के घरमें उतपन्न होनेसे जानकी इस नाम से विदित हुइहै उन का विवाहादि कर्म्म वेदोक्त विधिसे मिथिला में भया ॥२०॥ इसलिये मिथिला पुण्यस्थान और भुक्तिमुक्ति को

विदेहस्य गृहेजाता वैदेही तेन कीर्तिता ॥ तस्याः पाणिग्रहः कर्म मिथिलायां-यथाविधि ॥२०॥तस्मात्सा मिथिला श्रेष्ठा भुक्तिमुक्ति प्रदायिनि ॥ अधर्माः कर्म भ्रष्टाश्च मिथिलायां वसंति ये ॥२१॥ द्वेषिज्ञानविशून्याश्च द्रोहिणः परनिंदकाः॥ गोघ्नाःसुरापिनो ये च तथैव ब्रह्मघातकाः ॥२२॥ हरिभक्ति विहीनाश्चमुच्यन्ते

देनेवाली भई अधर्म और कर्म्मरहित जन, मिथिलामें जो निवास करते हैं ॥ २१ ॥ एवं दुसरेसे द्वेष करने वाले तथा 'ज्ञान रहित' वो 'परद्रोही, और दुसेर का निन्दा करनेवाले और मदिरा पान न करनेवाले गोवधी और ब्रह्मघाती जितने मिथिलामे निवास करनेवाले हैं ॥२२॥

वे मिथिलामें निवासही करनेसे जीवन्मुक्त होतेहैं सौ सूर्यग्रहण काशीमें स्नान करनेसे जो
पुण्य होताहै ॥२३॥ वह पुण्य आधापहर मिथिलामें निवास करनेसे होता है इसमें कुछ संदेह
नहीं ॥२४॥मकरके सूर्य होनेसे प्रयाग स्नान करनेसे जो पुण्य होताहै उससे करोड गुण अधिक

नात्र संशयः ॥ ये तु वाराणसीस्नानात्सूर्य्यग्रहशतेष्वपि ॥२३॥ प्रहरार्द्धेन तत्पुण्यं मिथिलायां हि जायते ॥ मकरस्थे रवौ माघे प्रयागे स्नानजंफलम् ॥२४॥ तस्मात्कोटिगुणं पुण्यं निमेषे मिथिलास्थिते ॥ यत्पुण्यं द्वारकां गत्वा श्रीविष्णोर्मुखदर्शनात् ॥२५॥ प्रहरार्द्धेन तत्पूण्यं मिथिलायां च जायते ॥ पुराणा-

पुण्य मिथिलामें एक पल निवासकरनेसे होताहै द्वारकामें जाकर विष्णुका दर्शन करनेसे जो
पुण्य होताहै ॥२५॥ वह पुण्य आधापहर मिथिलामें निवास करनेसे होताहै विधिपूर्वक पुराण
को पढने और श्रवणकरने से जो पुण्य होताहै वह पुण्य दोपहर मिथिला निवास करनेसे होता

है ॥२६॥ कानको सुख देनेवाला यह वचन सुनकर नारदजी फिर ब्रह्मासे पूछनेलगे ॥२७॥ हे ब्रह्मन् पहिले मिथिलामें निवासमात्रहीसे कौन मुक्त हुआहै और मरनेसे कौन मुक्त हुआहै यह

नां च पठनाच्छ्रवणाद्वा यथा विधि ॥२६॥ दिनार्द्धेन च तत्पुण्य मिथिलायां च जायते। इति श्रुत्वा गिरं तस्य विधेः श्रोत्रसुखावहम्। नारदोहृष्टवदनः पुनस्तंप्र युवाचह ॥२७॥ नारदउवाच ॥ मिथिलावासमात्रेण कोमुक्तिं प्राप्तवान्पुरा ॥ मरणेनापि कोमुक्तिं सर्वज्ञोसि वद प्रभो ॥ २८ ॥ येन विज्ञानमात्रेण जायते निश्चला मतिः ॥२९॥ श्रीब्रह्मोवाच ॥ साधुपृष्टं त्वया वत्स सर्वलोकहिते रतः। गतश्चविष्णुलोकं वै मिथिलामरणाद्द्विजः ॥ ३० ॥ पुरा माहिष्मती

बात मुझसे आपकहें सर्वज्ञ है ॥२८॥ ब्रह्माजी कहने लगे कि हे पुत्र तुमने अच्छा पूछा सर्वलोकके हितकारार्थ म रतहौ मिथिलामें मरनेसें एकब्राह्मण ब्रह्मलोकमें गया था ॥२९॥३०॥ पूर्वस

मयमें महिष्मती नाम एक नगरी थी उस सुन्दरनगरीमें सुकर्मा नामक ब्राह्मण ख्यात था ॥३१॥
॥ वह परस्त्रीमें अत्यन्तआसक्त था दूसरेकी निन्दामें निपुणथा मद्य तथा अन्य विषयमें भी

नाम्नी नगरी चातिशोभना ॥ तस्यां च वसतेः विप्रः सुकर्मा नाम विश्रुतः ॥३१॥
परस्त्री निरतःसोपि परनिन्दा परायणाः ॥ मद्यपोविषयासक्तः परद्रव्यापहारकः
॥३२॥ धनान्याहरते नित्यं सुतस्त्रीजीववंचकः ॥ विष्णुभक्तिविहीनश्च सर्वपाप
रतस्तदा ॥३३॥ देशाद्देशांतरं जातः क्रयविक्रयकारणात् ॥ कदाचिद्दैवयोगेन
मिथिलायामुपागतः ॥ ३४ ॥ नानाधनैः समाकीर्णं विक्रयार्थं च घोटकान् ॥

आसक्त था लोभवसहोकर दूसरके धन चोरानेमें भी निपुण था ॥३२॥ और धन धान्य न रह
ने से पुत्र और स्त्रीको वञ्चक था विष्णुकी भक्तिसे रहितथा सव पापकरनेवाला था ॥३३॥ वह
कदाचित् दैवयोगसे वेचनेके लिये और खरीदनेके लिये देशदेशान्तरसे घूमते फिरते मिथिला

में पहुँचा ॥३४॥ और नाना प्रकारके धनसे युक्त घोडा आदिको बेचते हुये बहुतरोज मिथिला में रह गया ॥३५॥ किसि समयमें कर्मवश से उस को सांपने काटलिया अनन्तर वह मरगया तब बडे२ कठोररूपवाले यमदूतोंने ॥३६॥ हाथमें पास लेकर उस पापीको बांधकर शीघ्र यम

क्रयविक्रयकृत्तत्र अवसद्बहुवासरान् ॥३५॥ कदाचिद्दैवयोगेन द्विजिह्वेन स दंशितः ॥ मृतस्तं पाशहस्तास्ते यमदूताःसुदारुणाः ॥३६॥ तं वध्वा पापिनं शीघ्रं नीतं यमपुरे तदा ॥ धर्मराजस्तु तं दृष्ट्वा चित्रगुप्तमपृच्छत ॥ ३७ ॥ किमस्याः-स्ति कर्मफलं तत्स्थानं दीयतामिति ॥ चित्रगुप्त उवाच ॥ आजन्ममरणान्ते वै

लोकमें लेगए वहाँ ब्राह्मणके निन्दितकर्मको देखकर धर्म्मराजको निवेदनकिया ॥३७॥ धर्म्मराज उस को देखकर चित्रगुप्तसे बोले हेमहाराज जैसा इसने कर्मकियाहै वैसा इनको स्थान दीजिय ॥ चित्रगुप्तजी कहतेहैं कि जन्मसे लेकर मरण पर्य्यन्त इसका कोई कर्म्म उत्तम नहीं हैं ॥

३८॥ इस लिये घोरजो खदिरांगार पूरित, नामकाकुण्ड उसमें यह पचाकरै इस भांति चित्रगुप्त
के वचन को सुनकर यमराज गम्भीरवाणीसे ॥३९॥ दूतोंको आज्ञा दिया कि तुम लोग इसको

मत्कर्म नैव विद्यते ॥३८॥ पच्यतां नरके घोरे खदिरांगारपूरिते ॥ इति श्रुत्वा
वचस्तस्य यमोगम्भीरया गिरा ॥३९॥ दूतानाज्ञापयामास नरकेऽमुनयन्त्विति ॥
दूतास्तद्वचनं श्रुत्वा खदिरांगारपूरिते ॥४०॥ नरकेप्रापयामासुर्ब्राह्मणं दुष्टचेष्टि-
तम् ॥ तं दृष्ट्वा खदिरांगारः शीतस्पर्शोऽप्यजायत ॥४१॥ दूतास्ते विस्मितायाता-
तास्तं दृष्ट्वा महदद्भुतम् ॥ यमं निवेदयामासुस्तत्कथां विस्तरेण वै ॥४२॥ एत-

नरकमें लेजाव दूतलोग यमराजका वचन सुनकर खैरके अङ्गारका जो नरकहै ॥४०॥ उसमे
दुष्टचेष्टितब्राह्मणको डालदिया उस पातकी ब्राह्मणको देखकर खदिरांगार नरक जो अत्यन्तगर्म
थाः वह सीतल होगया ॥४१॥ इस अद्भुतकर्म को देखकर दूतलोग विस्मित होगए और जमरा

जको निवेदन किया ॥४२॥ इसी अनन्तर विष्णुदूतभी दीव्यरूपको धारणकियहुये विमानपर चढ़कर जहां वह ब्राह्मणथा वहां पहुचे ॥४३॥ उन लोगोंसे यमराज आदरपूर्वक इस वचनको

स्मिन्नन्तरे तत्र विष्णुदूताः समागताः ॥ विमानमधिरूढास्ते दिव्यरूपधराव-राः ॥४३॥ यमोपि विष्णुदूतांस्तान्परिपप्रच्छ सादरात् ॥ यम उवाच ॥ आज-न्ममरणान्ते च दुष्कर्मनिरतःसदा ॥४४॥ कुकर्मपरिहारेण किमनेनकृतंशुभ-म् ॥ केन पुण्यप्रभावेन नीयते विष्णुमन्दिरम् ॥ ४५ ॥ श्रीविष्णुदूत उवाच ॥ यद्यप्ययं पापराशिः क्रूरकर्मा विमूढधीः ॥ मिथिलामरणंनैव सर्वं दुष्कर्मनाशि

१६९ कहा हे विष्णुदुत जन्मसे लेकर मरण पर्यन्त इस ब्राह्मणने पापही कियाहे ॥४४॥ कुरकर्मको छोडकर इसने पुण्य कभी नही किया क्या पुण्यकिया है जो विष्णुके मन्दिरमें जानेवाला हुआ १३९

॥४५॥ विष्णुदुत कहने लगे यद्यपि यह ब्राह्मण पापराशिहै और कुरकर्मका करनेवालाहै और

मूर्ख है तथापि यह मिथिलामें निवासकियाहै जिससे इसका सबपाप नाशहोगयाहै ॥४६॥ इसी हेतु से यह ब्राह्मण पापरहित है ॥ जानकीकी जन्मभूमि में जिस मनुष्यकी मृत्यु होतीहै वह पापात्माभी होतो मिथिलामें मरनेसे मुक्त होताहै ॥४७॥ श्रीब्रह्माजी नारदजी से कहतेहैं इसी

तम् ॥४६॥ जानकीजन्मभूमिं यः प्राणत्यागं करोति वै ॥ स याति विष्णुपदवीं पापराशिसमोपि हि ॥४७॥ एवं यमं प्रबोध्यैव दूतास्ते ब्राह्मणंद्रुतम् ॥ रथं च तं समारोप्य विष्णुलोकं गतास्तदा ॥४८॥ तेनेयं मिथिलापुण्या सर्वपापविनाशिनी ॥ ये त्यजंति शरीराणि तस्यां ते मुक्तिभागिनः ॥४९॥ ते धन्याः कृतकृत्या

भांति से विष्णुदूत यमको प्रसन्न करके ब्राह्मणको रथके उपर चढाकर छणभरमें विष्णुलोकको चले गए ॥४८॥ इसी हेतु से मिथिलापुरी पुण्य और सबपापको विनाश करनेवाली हुई और जो पुरुष मिथिल में शरीरको त्याग करताहै वह अन्तमें मुक्तिका भागी होता है ॥४९॥ कलि

युगमें वही धन्यहै और वही पुण्यवान् है और वही कृतकृत्यहै जो मिथिलामें सततकाल निवा स करताहैं ॥५०॥ पर जितने देवगणहैं और वह गन्धर्वगण और इन्द्र विष्णु शिव आदि जितने

श्च पुण्यवन्तश्च ते सदा ॥ ये वसंति सदा तत्र मिथिलायां कलौ युगे ॥५०॥ सर्वे देवाःसगन्धर्वाः ब्रह्मविष्णुशिवादयः ॥ वसंति मिथिलायां च नानारूपधराः शुभाः ॥५१॥ मिथिलायां गता ये च क्षणार्द्धं न वसन्ति ये ॥ तेषां जन्म वृथा भूमौ जीवनं निष्फलं भवेत ॥५२॥ श्रीपराशर उवाच ॥ एवं ब्रह्मा स्वयं साक्षात्पुलकाङ्कितमानसः ॥ माहात्म्यंकथयामास तव स्नेहान्मयाऽधुना ॥५३॥ ब्रह्म

देवताहैं वे सब अपने२ रूपको धारन करके सर्वकाल में मिथिलामें निवास करते हैं ॥५१॥ मि थिलाभूमिमें जो मनुष्य जिसने आधाक्षणभी निवास नहीं किया उसका जन्म और जीवन वृ थाहै ॥५२॥ पराशरजी मैत्रयजी से कहतेहैं हे मैत्रेय इसी भांति ब्रह्माजी अपनेही मुखसे मिथि

लोकका माहात्म्य श्रीनारदजी महाराजको कहा है ।।५३।। जिसके श्रवण करनेसे सबपापनाश होताहै ब्रह्मा और नारदके सम्वादको जो श्रवण करताहै या श्रवण करवाताहै उस पुरुषका ब्रह्म

नारदसंवादं शृण्वंति श्रावयंति ये ॥ तेषामागमनं नास्ति ब्रह्मलोकात्कदाचन । ।।५४।। पुनरन्यत्प्रवक्ष्यामि माहात्म्यं पापनाशनम् ॥ यस्य श्रवणमात्रेण ब्रह्म हत्यापि नश्यति ॥ ५५ ॥ इति श्रीवृहद्विष्णुपुराणे मिथिलामाहात्म्ये पराशर मैत्रेय सम्वादे त्रयोदशोऽध्यायः ॥१३॥

श्रीपराशर उवाच ॥ यमुनादुग्धवतीमध्ये पलार्द्धमपि यो वसेत् ॥ विधूय सर्वं

लोकसे फिर संसारमें जन्म नही होता है ।५४।। ❀ इतिश्रीवृहद् विष्णुपुराणे मिथिलामाहात्म्ये पञ्चविंशोऽध्यायः ॥ २५ ॥१३॥ ❀ ॥

दोहा दुग्धवती यमुना अभ्यन्तर ब्राह्मणसुत गतिपाइ सप्तदुगुनअध्यायमें रामायणअघजाइ १४

श्री पराशरजी मैत्रेयजी से कहतेहैं हे मैत्रेय फिर दुसरा भी मिथिला का माहात्म्य तुमको कहतेहैं जिसको श्रवण करने से ब्रह्महत्यादि पापसे पुरुष छूट जाताहै यमुना और दुग्धवती तीर्थ के अभ्यन्तर में जो मनुष्य आधा पलभी निवास करताहै वह सर्व पाप को भस्म करके परम

पापानि प्रयांति परमं पदम् ॥१॥ यत्र प्रयांति रसिकाः रामार्पितधियोऽनिशम् ॥ ब्रह्मणोपि भवस्यापि योगिनामपि दुर्लभम् ॥२॥ यद्धामरघुनाथस्य मायातीतं नीरंजनम् । पलार्द्धवासिनस्तत्र गच्छंत्येव न संशयः ॥३॥ यमुनादुग्धवतीमध्ये वासेन लभते फलम् तयोरन्तर्गतोयस्तु ब्रह्महापितृहाऽपि वा ॥४॥ दिव्यरूपम-

पदको प्राप्तहोताहै ॥१॥ मिथिलामें पलार्द्ध जो निवास करताहै वह मायातीत अर्थात् माया से रहित व निरुज अर्थात् दुःखादि रहित जो रघुनाथ का धामहै उसमें निवास करताहै इसमें संशय नहीं हैं ॥२॥ यमुना व दुग्धवती तीर्थ के अभ्यन्तर मेंजो मनुष्य वास करताहै वह ब्रह्महा

वा पितृहा होय तौ भी ब्रह्महा इत्यादि पापसे छूट जाता है ॥४॥ और दिव्य रूपको धारन करके निरामय अर्थात् जन्मबुढापा मरणआदि दुषसे रहित जो पदहै वहां प्राप्त होता है ॥५॥ और मिथिलामें जन्म लेकर मरनेकी इछा देवतालोगभी सबकालमें करते है और रोग पिडित जो मनु-

वाप्यैव गच्छेद्धामनिरामयम् ॥ कोटिजन्मार्जितैः पुण्यैर्बहुयज्ञैः सदक्षिणैः ॥५॥ विबुधाश्चापि मरणं तत्र वांछंति भक्तिनः ॥ किमुतान्ये दुराधर्षाः कालादिग्रसिता नराः ॥६॥ अत्र ते कथयिष्यामि कथां पौराणिकीं शुभाम् ॥ यां श्रुत्वा प्राणिनः सर्वे मुच्यन्ते सर्वकिल्बिषात् ॥७॥ तव प्रीत्या द्विजश्रेष्ठ लोकानां हितका

ष्य मर्त्यलोकमे है ॥६॥ उन को क्या कथा है इस विषये में पौराणको कथा तुमको वर्णन करते है हे मैत्रय जिसके श्रवण करने से उत्तम दुस्तर संसारसमुद्रमे मनुष्य पार होताहै ॥७॥ मैत्रय तुम्हारी प्रीतिके अधीन होकर लोकके हितके लिये वर्णन करतेहै सावधानहोकर मन को एकाग्र

करके श्रवण करो ॥८॥ माहिष्मती नाम कोई नगरी थी उसमे तेजस्वी विष्णुके समान ॥ ९ ॥
ब्राह्मण कर्म में आसक्त दुसरेके मंगलको करने वाला विष्णुभक्ति से युक्त प्रतापमें सूर्यके समान

म्यया ॥ सावधानेन मनसा शृणु विप्र कथामिमाम् ॥ ८ ॥ माहिष्मतीपुरे कश्चि
द्ब्राह्मणोवेदपारगः ॥ सुमित्र इति विख्यातस्तेजसा पावकोऽपरः ॥ ९ ॥ ब्रह्मकर्म
समायुक्तः परंश्रेयस्करःसदा ॥ विष्णुभक्तिपरःसाक्षात्प्रभयेव दिवाकरः ॥ १० ॥
आसीत्कृतयुगे तस्य प्रमदा च हरिप्रिया ॥ सुमित्रोपि स्त्रिया युक्तः सदार्चनरतो
हरेः ॥११॥ प्रत्यहं विष्णुचरितं सुमित्रोगाति तत्परः ॥ पुत्रास्तस्याभवन्विप्र च
त्वारः परमाद्भुताः ॥१२॥ सुशीलः सुमतिश्चैव धर्मपालोदुराशयः ॥ त्रयःपुत्राः

॥१०॥ और रात दिन अपनी स्त्री के साथ नारायणका नाम ।११॥ वो गान करने वाला सुमित्र
नाम एक ब्राह्मण रहता था उसको विलक्षण विलक्षण चार पुत्र हुये ॥ १२ ॥ सुशील १ सुमति २

१४५

धर्मपाल ३ दुराशय ४ परन्तु इन चारों में सुसील आदि तीन पुत्र तो पिताके समान भया और चौथा दुराशय ॥१३॥ वह दुराचार अर्थात् वेदोक्त आचार से रहित दुष्ट वात वोलने वाला नीच नीच दान को लेने वाला पापको सर्वदा करने वाला मदिरापान करने वाला ॥ १४ ॥ नारायण

पितुस्तुल्याः कनिष्ठोयंदुराशयः ॥ १३ ॥ दुराचारी दुरालापी दुष्प्रतिग्रहभाक् सदा ॥ दुष्कर्मनिरतःपापी जीवघाती सुरारतः ॥ १४ ॥ हरिनिंदापरा वेदनिंदको द्विजहिंसकः ॥ वेश्यामांसरतौदुष्ट संगप्रियतमः सदा ॥१५॥ यावन्ति सन्ति पापानि महदल्पानि यानि च ॥ दुराशयेन सर्वाणि दुरितानि कृतान्यलम् ॥१६॥ पित्रा जुगुप्सितं दृष्ट्वा गृहान्निःसारितः सुतः ॥ पुण्येकुलेकलङ्कश्च महतापापिना

वो वेद पुराण शास्त्रको निन्दा करने वाला वेश्या स्त्री में आशक्त और विप्रवध करने वाला भया ॥१५। सवप्रकारके छोटे तथा वडे पाप उस पापीने किया ॥१६॥ तव पिता सुमित्रजी महाराजने

उस पुत्र को निन्दित देखकर अपने घरसे निकाल दिया क्योंकि वडाभागी पुण्यवान के कुलमें
यह पापी वडा कलंकी पैदाभया इस से सम्पूर्णकुल कलंकित हो जायगा ॥१७। एकही चन्दन का
वृक्ष जिस वनमें रहताहै वह सम्पूर्ण वनको सुगंधित करताहै इसी भांति एक सपूत पुत्र जब कुल

कृतः ॥१७॥ एकोयदि सुवृक्षः स्याच्चन्दनस्य वने स्फुरन् ॥ गन्धयेत्सर्वविपिनं
सुपुत्रः स्वकुलं तथा ॥१८॥ एकोपि कोटरस्थाग्निर्भस्मसात्कुरुते वनम् ॥ यथा
तथा कुलं पुण्यं दुष्पुत्रोनाशयेत्क्षणात् ॥१९॥ इति संचिंत्यमनसा सुमित्रस्त्यक्त
वान्सुतम् ॥ दुराशयोपि दुष्टात्मा जगाम गहनं वनम् ॥२०॥ वनाद्ग्रामं समा-

में जन्म लेताहै तो संपूर्ण कुलको उज्वल करताहै ॥१८॥ और जिस भांति सूखाभया वृक्ष अपने
खोढरके अग्नि से सपूर्ण वनको जरा कर खाक करदेताहै उसी भांति कुपुत्र जिस कुलमें उत्पन्न
होताहै उस कुल को कलंक स दूषित कर देताहै ॥१९॥ इस बात को विचार कर सुमित्र ब्राह्मण

ने अपने पुत्रको निकालदिया और दुष्टात्मा दुराशय ने भी अपने को घर से निकलाहुआ समझ
कर कठोरवन को प्रस्थान किया ॥२०॥ और वह दुष्टात्मा वन मे गांवमें आ२कर मनुष्यों के
धन को छीन २ कर लेजाताथा उसी धन के द्वारा गांवसे मदिरा खरीदकर और वनमें पशु

गम्यमुमोष प्रत्यहं धनम् ॥ तेनैव मदिरासक्तोमृगहिंसा परायणः ॥ २१ ॥ एवं
प्रकुर्वतस्तस्य बहुःकालोगतोद्विजः ॥ एकदा दुष्टहृदयो हिंसां कर्तुं वने गतः ॥२२॥
तत्रैकोवपुषा श्रेष्ठोव्याघ्रोपि दैवप्रेरितः आगत्य तं दुरात्मानं गृहीत्वाऽभक्षय-

पंक्षियों को मार कर मास खाया करे इसी भांति अपने शरीर को पालन करताथा ॥२१॥
इसी भांति जब बहुत दिन बीतगया तब एक समय वह दुष्टाशय दुराशय नामक जो ब्राह्मण
था वह जीवोंको मारने के लिये वनमेंगया ॥२२॥ वहां कालवश से बड़ाभारी एक बाघ पहु-
चा और वह आकर दुराशयनामक जो ब्राह्मण था उसको खागया ॥२३॥ उसके भक्षन करने के

समय में एक मांस का टुकड़ा खर में लग गया था उसको कौओं ने खाने के लिये आरंभ किया
॥२४॥ उसी समय में दूसरा भी कोइ कौआ वहां आया और खाने के लिये उन कौवोंसे मांस का
टुकड़ा मांगा इसी अनन्तर में वे कौवे मासके टुकड़े लेकर वनके तरफ भागचले ॥२५॥ फिर वह

च्छनैः ॥२३॥ भक्षणे मांसखण्डानां तृणेष्वेकं पपातच ॥ पश्चात्काकोपिततखण्डं
गृहीत्वा भोक्तुमारभत् ॥२४॥ तत्रान्यकाकस्तं दृष्ट्वा देहि देहि तमब्रवीत ॥ सोपि
मांसं समादाय धावन्वेगाद्वनं प्रति ॥ २५॥ धावन्तमनुधावंस्तं प्रयातो मांसलंप-
टः ॥ वनाद्वनांतरं गच्छन्देशाद्देशान्तरं गतः ॥२६॥ संप्राप्तो मिथिलामध्ये काको

भी मांसका लालची कौवा उन कौवों को मांस छीनने के लिये खदा वह भी मांसके टुकड़े
को लेकर दूर उत्तरदिशा में भाग आया ॥२६॥ भाग कर मिथिलादेस में पहुंचा और उन
कौवों को मांस का खण्ड नहीं दिया फिर वह भी काक मांसके लालच बश होकर पुण्य भूमि

मिथिला में पहुंचा ॥ २७ ॥ फिर जहां दुग्धवती तीर्थ और जमुनातीर्थ हैं वहां आकर दोनों काक आपस में युद्ध करने लगे ॥२८॥ जव दोनो काग युद्ध में अत्यन्त आसक्त हो गये तव

मांसं न दत्तवान् ॥ सोप्यन्वगच्छन्मांसार्थी मिथिलां पुण्यभूमिकाम् ॥ २७ ॥ यत्र दुग्धवती पुण्या यमुना च शरिद्वग ॥ आजग्मतुस्तयोर्मध्ये काको युद्धं प्रचक्रतुः ॥२८॥ युद्धासक्तमुखान्मांसं पपात धरणीतले ॥ यमुनादुग्धवती मध्ये पूर्वपुण्य प्रभावतः ॥२९॥ तेनपुण्यप्रभावेन सर्वकल्मषमंदिरः । पापिष्टोपि क्षणाद्व विमुक्तः सर्वपातकैः ॥३० कोटिकंदर्पसदृशः सर्वाभरणभूषितः दुराशयो-

काक के मुख मे मांस का टुकडा जमीन में गिरगया यमुना और दुग्धवती पुण्यतीर्थ के वीच में ॥२९॥ उस मांस के टुकडे को गिरने मे दोनो तीर्थ के पुण्यप्रभाव से पापका घरजो दुराशय नामक ब्राह्मण था वह छनही भर में सव पाप से मुक्त हो कर ॥ ३० ॥ कोटि काम के समान

१५०

सुन्दर और सब भूषणों से भूषित सुन्दर अङ्ग प्रत्यङ्ग होकर ॥३१॥ उत्तम विमान उपर चढगया और गन्धर्वादि स्तुति करने लगे और अप्सरा लोग उस के सामने नृत्य करने लगी ॥३२॥

भवच्छीघ्रं दिव्यकायोऽतिसुन्दरः ॥३१॥ विमानवरमारुह्य स्तूयमाऽमरैर्मुहुः उपगीयमानोगंधर्वैरप्सराभिः समं ततः ॥३२॥ हर्षितोपि गतोधाम पुनरावृत्ति वर्जितम् ॥ इति ते कथिता विप्र कथा सर्वाघनाशिनी ॥३३॥ इति श्रीवृहद्वि-ष्णुपुराणे मिथिलामहात्म्ये पराशरमैत्रेयसम्वादे चतुर्दशोऽध्यायः ॥१४॥

मैत्रेय उवाच ॥ मिथिलायां त्वयोक्तानि नदीकूपसरांशि च । जलाशयानि

इसी भाँति नाना प्रकार के आनन्द को करते हुये जिस स्थानमें प्राप्तहोने से फिर जन्म नहीं होता उस स्थान को प्राप्त हुआ हे ब्राह्मण मैत्रेय संपूर्ण अघको नाशकरनेवाली यह कथा हमने तुम से वर्णन किया ॥३३॥ इतिश्रीवृहद्विष्णुपुराणे मिथिलामाहात्म्येषड्विंशोऽध्यायः ॥२६।१४॥

दोहा नीमित्रवशिष्ठ साापितपुनि मंथनामिथि अवतार, पंचदमः अध्यायमें रामायणसुखमार ॥१५॥

फिर मैत्रयजी पराशरजीसे पूछते हैं हे महाराज मिथिलामें जितनीं नदियां है और जितने कूप हैं और जितने तालाव है और भी जितने जलाशय हैं इन सवों को आप वर्णन किया परन्तु

यान्येव तेषां स्नानेन किं फलम् ॥१॥ विशेषेण मम ब्रूहि यदि ते मप्यनुग्रहः। कथामृतरसास्वादेतृष्णा मेतीव वर्द्धते ॥ २ ॥ गङ्गासागरमाहात्म्यंनिमेर्देहस्य मंथनम् ॥ चरित्रमद्भुतं पुंसां लोकानां विस्मयप्रदम् ॥३॥ शापितस्य शरीरस्य

इन सवों में स्नान करने से क्या फल होताहैं ॥१॥ यह आप वर्णन करिये हे माहाराज इस में जो कुछ विशेष है वह भी मेरे ऊपर कृपा कर के कहिये आपके मुख से निकला हुआ जो कथ रूपी अमृत उस को पान करनेसें तृप्ति नही होती किन्तु तृष्णा अधिक वढती जाती हैं ॥२॥ लोकमें आनन्द को देने वाले गंगासागरका माहात्म्य और पुरुषों का विस्मयका देनेवाला शाप से

युक्त जो राजा निमि का शरीर है उसके मंथनका जो चरित्र है वह मुझ से वर्णन करें ॥ ३ ॥ किस भांति सें उन के शरीर को मुनिलोग मन्थन किया और वशिष्ठ के शाप से किस भांति विदेहता को प्राप्त हुये ॥४॥ और किस भांति से निमि के शरीर को मन्थन करने से अतिधार्मि

मुनिभिर्मंथनं कृतम् । वशिष्ठेन कृतः शापस्तद्देहोदुर्गतिं गतः ॥४॥ कथं तद्देह-मथनान्मिथिर्जातोऽतिधार्मिकः । तत्कुले कथमुत्पन्ना सीता सर्वेश्वरेश्वरी ॥५॥ चाण्डालाद्दुष्कृतात्सर्पात ब्राह्मणाद्वैद्युतादपि । दंष्ट्रिभ्यश्च पशुभ्यश्च वृक्षादिपतनान्मृताः ॥६॥ यांति तेनरके घोरे ये च म्लेक्षादिभिर्हताः । न तेषां कारयेद्दाहं

क मिथिराजा उत्पन्न हुये और उन के वंसमें किस भांति सब जनों की ईश्वरी सीता महारानी उत्पन्न हुई ॥५॥ यह सब कथा आप यथावत् मुझ से वर्णन करे और चाण्डाल के मारने से जल में डुबने से सर्पके काटने से ब्राह्मणके शाप से ॥ बिजुली से मरने से पशु से वृक्षपतन से जिन

१५३

की मृत्यु होती है ॥६॥ वे घोर नरकमें प्राप्त होते हैं और म्लेक्ष (जवन आदि) मे जिनको मृत्यु होती
है वे भी घोर नरकमे निवास करतेहैं उन लोगोंका स्पर्श और सूतक उदकक्रिया न करे ॥७॥
ये बातें धर्मशास्त्रमें कहीहुई है और हमलोग सुनते भी हैं तब हे महाराज पराशरजी कैसे मुनि

सूतकं नोदकक्रियाम् ॥७॥ इत्यादि शास्त्रकथितं बहुधा श्रूयते मया। तत्कथं त-
च्छरीरस्य मथनं मुनिभिः कृतम् ॥८॥ एतन्मे संशयं ब्रह्मन्विस्तरात्ब्रूहि मे गुरो
एतच्छ्रुत्वा वचस्तस्य ततोवक्तुं प्रचक्रमे ॥ ९ ॥ श्री पराशर उवाच ॥ साधुपृष्टं
त्वया वत्स सर्वलोकहिताय च। कथयिष्याम्यहं सर्वं संक्षेपाच्छृणु तत्वतः॥१०॥

लोग राजा निमिके शरीरका मन्थन किया ॥ ८ ॥ यह मेरे को संशय उत्पन्न होता है ब्राह्मण
पराशर इस कथा को आप विस्तार पूर्वक वर्णन करें मैत्रेय के इस वचन को सुन कर श्रीपराशर
जी बोले ॥९॥ हे मैत्रेय तुमने अच्छा पूछा जिससे सबलोगों का उपकार हो हम भी तुमको

यथार्थवात संक्षेप करके कहते हैं तुम श्रवण करो ॥१०॥ एक समय वशिष्ठ मुनिने राजा निमि को शापदिया तव राजा निमिने भी वशिष्ठको शाप दिया इस भांति परस्पर शापसे विदेहभावको प्राप्त होकर वायु को भोजन करते हुये आकाश में रहने लगे ॥११॥ दोनोंको आकाश में भ्रम

वसिष्ठेन यदा शप्तो राजर्षिरपि सप्तवान् ॥ विदेहत्वं द्वयोरासीद्वायुभूतौ नभ-स्थले ॥११॥ भ्रमंतौ वीक्ष्यसहसा देवा विस्मयमाययुः ॥ तदा देवाज्ञया राजा प्राणिनां निमिषे स्थितः ॥१२॥ वसिष्ठोपि तथा सद्यः कलशाभ्यांतर गतः ॥ ब्रह्मपुत्रोह्यभूत्तस्माद्ब्रह्मर्षित्वमुपागमत् ॥१३॥ ततोमुनिगणाः सर्वे तपोवनस-

ण करते हुये देखकर देवतालोग बहुत आश्चर्य्यित हुये तव देवताओं की आज्ञा पाकर राजा निमि ने प्राणियों के पलक में प्राप्त हुये ॥१२॥ वशिष्ठजी भी देवतावों की आज्ञा पाकर कलश के मध्य में निवास किया इस लिये ब्रह्माका पुत्र ब्रह्मर्षि हुये ॥१३॥ वाद इसके सव मुनिलोग

तपोवनमें एकट्ठा होकर विचार करने लगे राजाके नही रहने से तपस्या यज्ञ आदि कर्म्म किस
भांति सम्पन्न होगें ।।१४।। इस बात को विचार कर सबमुनिलोग यथा गौतम जाज्ञवल्क्य विश्वा
दास्थिताः ॥ अराजके कथं कुर्म्मस्तपोयज्ञादिकाः क्रियाः ।।१४।। इति संचिंतय
न्तस्ते साधवः समदर्शिनः ॥ गौतमोयाग्यवल्क्यश्च विश्वामित्रोभृगुस्तथा ।१५।
भारद्वाजोथवाल्मीकिर्ये ते तत्र समास्थिताः शरीरमथनार्थाय सर्वे तत्र समा-
गता ।।१६।। वामदेवोशितः कण्वश्चागस्त्योभार्गवस्तथा दृष्ट्वा देहं सकलुषं
ब्रह्मशापेन संयुतम् ।।१७।। अस्पृश्यत्वं च विप्राणां ध्यात्वा श्रुत्वा हरिंप्रभुम्
मित्र भृगु ।।१५।। भरद्वाज वाल्मीकि आदि जो तपोवनके रहने वाल मुनिलोग जो२ राजा निमि
के शरीर मंथन करने के लिये आये थे ॥ १६ ॥ वामदेव असित कण्व अगस्त्य भृगु इत्यादि सब
वे ब्राह्मण के शापसे युक्त शरीर के देख कर ।।१७।। ब्राह्मणों के स्पर्शके योग्य नहीं समझ कर ना

रायणको ध्यान और स्तुति करने लगे तब भक्तवत्सल नारायण प्रसन्न हो कर सनकादि ऋषि
तथा लक्ष्मीके साथ गरुड के ऊपर सवार होकर जहां मुनिसब थे वहां आये ॥१८॥ श्रीनाराय
ण बोले हे मुनिलोग हम आपलोगोंकी स्तुति से प्रसन्न हुये ॥१९॥ आप लोगों की जो कुछ

तत्र प्रसन्नो भगवान् गरुडोपरि संस्थितः ॥१८॥ श्रिया सह समायुक्तः सनका-
दिभिरन्वितः ॥ तत्रागत्याब्रवीद्विष्णुस्तान्मुनीन्भक्तवत्सलान् ॥ १९ ॥ भवतां
स्तुतिवाक्येन तुष्टोहं मुनिपुंगवाः ॥ यद्वांछितं भवद्भिश्चसुदुर्लभमपिक्षणात् २०
साधयिष्ये न संदेहो ब्राह्मणा मम बांधवाः ॥ इत्युदीरितमाकर्ण्य हरेरद्भुतकर्मणः

इछा है उसको आपलोग प्रकाश करें वह यदि दुर्लभ भी हो तो भी उसको हम पूर्ण करेंगे ॥
२०॥ क्यों कि इसमें कोई सन्देह नहीं हैं क्योंकि ब्राम्हणलोग हमरे बान्धव हैं आश्चर्यकर्म्म
को करनेवाले नारायण की यह वाणी सुनकर ॥२१॥ ऋषिलोगों ने उठकर नारायणको साष्टांग

दण्डवत् किया तब अपने शिरको झुकाकर हाथको बांधकर मुनिलोग बोले ॥२२॥ कि हे महाराज
आप के चरणकमलों के दर्शन से हमलोग आज कृतार्थ हुये तथापि थोड़ा काम हमलोगों का

॥२१॥ प्रणेमुस्ते समुत्थाय साष्टांगं चरणाम्बुजे ॥ ततः प्राञ्जलयः सर्वे प्रोचुस्ते
नतकन्धराः॥२२॥ कृतार्थाःस्मोवयं सर्वे त्वत्पदाम्बुजदर्शनात् ॥ तथापि किञ्चि·
दस्माकं कार्य्यं मस्ति पुरोत्तम ॥२३॥ निमेः शरीरमथनं कर्त्तुमिच्छास्ति साम्प्र·
तम् ॥ अस्पृश्यश्चाशुचिर्देहो कथं शुध्यति हे प्रभो ॥२४॥ कृपां विना ते विश्वा
त्मन्नैवदुःखं विद्यते ॥ एतद्वाक्यं समाकर्ण्य भगवान्सरितां पतिम् ॥२५॥ अ·

रह गया है ॥२३॥ इसलिये इस समय में राजा निमि के शरीर की मथन करने की इच्छा है
परन्तु राजा निमि का शरीर स्पर्श (छूनके) योग्य नहीं है और अशुचि है अर्थात् अपवित्र है
हे नारायण किसभांति हमलोगों की शुद्धि होगी ॥२४॥ मुनिलोगों की यह बात सुनकर नारा

यण ने समुद्र को स्मरण किया ॥ २५ ॥ तब सुन्दर शरीर धारणकर समुद्र आये जिसके वायें तरफ गंगाहैं और दहिनेतरफ जमुना हैं ॥२६॥ और पीठ के तरफ पुण्यको देनेवाली जितनी

स्मारयत्तदा तत्र स्वागतोदिव्यरूपधृक् ॥ वामपार्श्वे स्थिता गंगा दक्षिणे यमुना तथा ॥२६॥ पृष्ठे च सरितःसर्वाः दिव्यरूपाः समागता ॥ कोटिब्रह्माण्ड मध्येतु यानि तीर्थानि सन्ति वै ॥२७॥ तत्रागत्य च सर्वाणि सरितः सागरास्तथा ॥ अग्रे स्थितानि तीर्थानि विष्णोः प्रीतिकराणि हि ॥२८॥ ततोमुमुदिरे सर्वे मुनयः साधुवादिनः ॥ जयशब्दोनमःशब्दस्तुमुलोभून्महद्ध्वनिः ॥२९॥ तदा

नदियां हैं वे सभी आई हैं और भी ब्रह्माण्डमें जितने तीर्थ हैं वे सबभी वहां प्राप्त हुय ॥२७॥ परन्तु हे नारायण आपकी कृपाविना ये सब इस दुःखसे उद्धार नहींकरसकते अनन्तर विष्णुभगवान के प्रसन्नकरने के लिये जितने तीर्थ आये थ ॥ २८ ॥ उनको देखकर सत्यवादी मुनिलोग

१५९

परम हर्षको प्राप्तहुये और जयशब्द और नमः शब्दको उच्चारण करनेलगे यह सब शब्द मिलकर बडाभारी शब्दहुआ ॥२९॥ इस समयमें विष्णुकी आज्ञ पाकर मुनिलोग समुद्र गंगा आदि तीर्थों के पवित्र जल से ॥३०॥ राजा निमि के शरीर को धोलवाकर मथन करनलगे मथन के बाद

ज्ञया भगवतोमुनयःसंशितव्रताः ॥ गंगाब्धिसलिलैः पुण्यैस्तथा तीर्थोदकैः पुनः ॥ ३० ॥ निमेर्देहं स्नापयित्वा ममन्थुर्देववाक्यतः ॥ मन्थनात्तस्य देहस्य मिथिनाम नृपोऽभवत् ॥३१॥ पुष्पवृष्टिःपपातोच्चैर्ननृतुश्चाप्सरोगणाः ॥ देवदुंदुभयोनेदुस्तुष्टुवुः सिद्धचारणः ॥३२॥ तत्रोत्सवे महातीर्थे गंगासागरकेप्रभुः ॥

उस शरीर से मिथि नामक राजा उत्पन हुआ ॥ ३१ ॥ तब आकाशमे पुष्पकी वृष्टि होनलगी अप्सरालोग नाच करनेलगी और देवतालोग नगाड़ा वजानेलगे सिद्धिचारणलोग स्तुति करने लगे ॥३२॥ उस समयमें महापुण्यस्थान जो गङ्गासागरहै वहां समुद्र और गंगाआदि नदी और

तालाब आदि जितने तीर्थ हैं ॥३३॥ उन सभों में नारायण स्तुति को पाकर श्रीविष्णुभगवान
अन्तर्ध्यान हुये और समुद्र गंगा आदि नदी श्रीविष्णुभगवान की स्तुति और प्रणाम करके ३४

सागरञ्च नदीं गंगां सरितश्चसरांसि च ॥३३॥ तीर्थानि चाप्यनुज्ञाप्य स्वयमन्तर्दधे हरिः ॥ स्तुत्वा नत्वा हरिं सर्वे सागराद्या जलाशयाः ॥३४॥ स्वं स्वं जलं च संस्थाप्य तत्रैवान्तर्ययुस्ततः ॥ ब्रह्माद्या देवताश्चैव स्नात्वा स्तुत्वा गता दिवम् ॥३५॥ ततो मुनिगणास्तत्र गंगासागरके जले ॥ स्नात्वा स्तुत्वा गताः स्थानं स्वं स्वं तेपि मुनीश्वराः ॥ ३६ ॥ तस्मात्सर्वाणि तीर्थानि सरितश्चसरांसि च ॥

अपने२ जल को वहां स्थापन करके अन्तर्ध्यान होगये और ब्रह्मा आदि देवताओंने भी वहाँ
स्नान और स्तुति को करके स्वर्ग चलगये ॥३५॥ अनन्तर गौतम आदि मुनियों ने भी गंगासा
गर के जल में स्नान और स्तुति को करके अपने२ स्थान को प्रस्थान किया ॥३६॥ जिस गंगा

सागर के संगम में गंगाजी के जल से जितने पातक हैं वह नष्ट होते हैं और जितने तीर्थ हैं
उन सबमें गंगासागर तीर्थ उत्तमहैं पवित्रहै और सबपापको विनाश करनेवाली हैं ॥३७॥
जिस गंगासागरके जलको स्पर्शकरने (छूने) से ब्रह्महत्यादि जितने पातक हैं वह सब छुटजाते

तिष्ठंति सर्वदा तत्र गंगासागरकं जले ॥३७॥ तज्जलस्पर्शनात्सद्यो ब्रह्महत्यादि
पातकात् मुच्यते नात्र संदेहोविष्णुलोकं सगच्छति ॥३८॥ गांगेयं सलिलं यत्र
सर्वाघौघनिवारणम् ॥ सर्वतीर्थमयं तीर्थं पवित्रं भुवि दुर्लभम् ॥३९॥ सर्वतीर्थेषु
यत्पुण्यं सर्वक्षेत्रेषु यत्फलम् ॥ तत्फलं समवाप्नोति गंगासागरदर्शनात् ॥४०॥

हैं और मनुष्यदेह को त्याग करने के वाद विष्णुलोक में जाताहै इसमें कुछ सन्देह नहीं है ॥
३८॥ सम्पूर्णतीर्थ मे भ्रमण करने से और स्नान करनेमे जो पुण्य होता है और क्षत्रों में स्नान
करने म भ्रमण करने से जो पुण्य होताहै वह पुण्य गंगासागर के दर्शनही से होता है ॥४०॥

१६२

बहुत जन्मका कियहुआ जो पापहै वह गंगासागर के दर्शन स्पर्श और स्नान से छूट जाता है इसमें कुछभी सन्देह नही है ॥४१॥ जेष्ठशुक्ल दशमी में देवतागण और मुनिगण तथा नारदादि

कोटिजन्मार्जितं पापं स्वल्पं वा यदि वा बहु ॥ दर्शनात्स्पर्शनात्स्नानान्मुच्यते नात्र संशयः ४१ ज्येष्ठशुक्लदशम्यां तु ब्रह्माद्या देवतागणाः। स्नानार्थं तत्र गच्छंति मुनयो नारदादयः॥४२॥ यस्मान्महोत्सवस्तत्र तस्मिन्नेव दिने भवेत्। तस्मात्सर्वजनैः कार्य्याः स्नानदानादिकाः क्रियाः ॥४३॥ किं जपैः किं तपोभिश्च किं व्रतैः साधनैरपि। तीर्थाटनैश्च दानैश्च किं शरीरादिशोषणैः।४४। सर्वेषां फलमाप्नोति

स्नानके लिये गंगसागरको जाते हैं॥४२॥ जिस लिये ज्येष्ठशुक्लदशमी को सम्पूर्णतीर्थ और सम्पूर्ण ऋषि मुनिगण तथा ब्रह्मादि देवगण उसी तिथिमे इकट्ठे होते हैं इसलिये सब जनोंको उचित है कि स्नान ध्यानादि कर्म्म उस मास और उस तीथिमें करें ॥४३॥ जप करनेसे और तप करने से

१६३

तथा विविधसाधन करने से और तीर्थाटन दान योग करने से जो फल होताहै ॥४४॥ वह गंगासागरके दर्शन से होता है श्रीविष्णुभगवान कहते हैं कि गंगासागर में स्नान दान तप आदि का फल हम नहीं कह सकते ॥४५॥ एक वार स्नान करने से भी पुरुष मुक्त होता है इस में

गंगासागरदर्शनात् । किमन्यद्बहुनोक्तेन जल्पितेन पुनः पुनः ॥४५॥ स्नानदानजपादीनां फलं वक्तुं न शक्यते । सकृत्स्नानेन मुक्तिःस्यान्नात्र कार्य्या विचारणा ॥४६॥ गंगाब्धिसलिले स्नात्वा दृष्ट्वा विष्णोः पदांबुजम् ॥ ब्रह्महत्यादिभिः पापैर्मुच्यते नात्र संशयः ॥४७॥ गंगासागरकीर्त्तनात्स्मरणतः स्नानं च पानं तथा ।

कुछ सन्देह नहीं करना ॥४६॥ गंगासागरके जल मे स्नान करके श्रीविष्णुभगवान के चरणकमलका दरशन करने से ब्रह्महत्या आदि पापों से मनुष्य छुट जाता है ॥४७॥ श्रीगंगासागरका कीर्तन मनन स्नान यात्रा ध्यान नेत्र से जलका दर्शन स्पर्शन प्रणाम करने से ॥४८॥ अनेक

जन्मके किये हुए पातक से छुटकर इस लोक में उत्तम सुखको भोग कर देवता राक्षस गन्धर्व आदिको दुर्लभ जो विष्णुभगवान की पुरी है वहां वह पापी जाकर के आनन्द करता है ॥४९॥

ध्यानात्तज्जलदर्शनाच्च नयनैः संस्पर्शनाद्वन्दनात् ॥४८॥ मुक्तापापमनेक जन्म सुकृतं भुक्त्वाचभोगादिकान् । गत्वा विष्णु पुरीं सुरासुरनुतां पापीजनोराजते ४९ एतत्तेकथितं विप्र गंगासागरवर्णनं । यःपठेच्छृणुयाद्वापि मुच्यते कोटिकिल्बिषात ॥ ५० ॥ ❀ ॥ इति श्री वृहद्विष्णुपुराण मिथिलामाहात्म्ये पराशरमैत्रेय सम्वादे पंचदशोऽध्यायः ॥ १५ ॥

 हे मैत्रेय यह गंगासागर का माहात्म हमने तुमसे वरणनकिया पराशरजी कहते है इसको जो पढता है तथा श्रवण करताहै वह कोटि२ पातकसे छूटजाताहै ॥५०॥❀॥ इति श्रीवृहद्विष्णुपुराणे मिथिलामाहात्म्ये सप्तविंशोऽध्यायः ॥२७॥१५॥ ॥ ❀ ॥

दोहा । जनक सरोवर महत्त कहिय: षोडस अध्याय, धर्मदत्तकृत वरण्यो रामायण विलगाय १६

अब फिर मैत्रेयजी पराशरजी से पूछते हैं कि हे महाराज जनक का भी शरोवर है उसका माहात्म्य वर्णन करिये उसमे स्नान करनेसे क्या पुण्य तथा क्या फल होताहै ॥१॥ पाराशरजी

मैत्रेय उवाच ॥ जनकस्यसरोप्यास्ति माहात्म्यं वद मे गुरो । तस्मिं स्नानेन किं पुण्यं किं फलं प्राप्नुतेजनः ॥ १ ॥ श्री पराशर उवाच ॥ जनकस्य सरो दृष्ट्वा यत्फलं लभतेनरः ॥ तदहं संप्रवक्ष्यामि श्रुत्वापापात्प्रमुच्यते ॥ २ ॥ ब्रह्महा पितृहाचैव गोत्रहागुरुतल्पगः । मुच्यते किल्विषैः सर्वैः दृष्ट्वा जनकसाग-

कहे । हे हे मैत्रेय जनकके शरोवर का दर्शन करनेसे जोफल मनुष्यलाभ करताहै वह हम तुम से कहते हैं जिसके श्रवण करने से मनुष्य पवित्र होताहै ॥२॥ ब्रह्महाहो पितृहाहो वा गुरुतल्पगहो वहभि यदि जनकके शरोवरकी दर्शनकरे तो सबपातक से मुक्तहोजाय ॥३॥ हे मैत्रे

य इस विषय में पुराणकी कथा हम तुमको सुनाते है जिसके सुनने से पुरुष मुक्तिको लाभ करता है ॥४॥ पहिले सतयुगमें कपिलनाम नगरमें धर्म्मदत्त नामक एक वडा धर्म्मात्मा राजाहुआ॥५॥

रम् ॥३॥ तत्रैवोदाहरिष्यामि चेतिहासं पुरातनं । यच्छ्रुत्वा सर्वपापेभ्यो मुक्तो भवतिमानवः ॥४॥ पुराकृतयुगे कश्चित्कांपिल्ये नगरे शुभे ॥ धर्मदत्तइति ख्यातो राजापरमधार्मिकः ॥५॥ नीतिमान्गुणसंपन्नः शास्त्रतत्वार्थकोविदः । प्रजानांपालनेशक्तो गोब्राह्मण हितेरतः ॥६॥ तस्यायुत सहस्राणि स्त्रियः परमशोभनाः । रूप शीलगुणैर्धन संपन्ना यौवनेस्थिताः ॥ ७ ॥ यासां रूपेण शीलेन लज्जिता

वह नीतिको जानने वाला सब गुणोंसे सम्पन्न सब शास्त्रके अर्थको जानने वाला प्रजाकी रक्षामें तत्पर गो ब्राह्मणकी रक्षा करनेवाला था ॥६॥ उसको दशहजार स्त्रियां थीं वे परम सुन्दरी और सब रूप शील गुणसे युक्त तथा युवा अवस्था को प्राप्तथीं ।७। जिनकी सुन्दरता और शीलसे कोटि२

काम लज्जित हो उन सब स्त्रियोंके बीचमें रन्ति देवी नामसे प्रसिद्ध जोथी ॥८॥ वह सब स्त्रियोंमें
अतीव सुन्दरी और पतिव्रता थी जिसमें राजा धर्म्मदत्त अतीव आसक्त था ॥९॥ वह राजा काम

रतिकोटयः ॥ ता सां मध्ये रंतिदेवी नाम्नी च भुविसुन्दरी ॥८॥ अतीव रूप
संपन्ना पातिवृत परायणा ॥ तस्यामतीवसंसक्तो कामीराजा दिवानिशम् ॥९॥
उदयास्तं न जानाति सूर्य्यस्यरतिमोहितः ॥ राज्यादिकं परित्यज्य रंतिदेव्या
सहास्थितः ॥१०॥ क्रीडासक्तो वशीभूतो न किंचिदपि वेत्ति सः ॥ राज्ञोवृत्तं श्रुतं
सर्वं शत्रुभिश्चापिचारकैः ॥११॥ एकमन्त्रमुपागम्य राज्ञो राज्य हृतं नृपै ॥ शत्रु

मोहित होकर कब संध्या होताहै और कब प्रात होताहै यह नहीं जानता था अपने राजकाज छोड
कर सतत रंतीदेवीके पास बैठा रहता था १० क्रीड़ामें अत्यन्त आसक्त होनेसे और रंतीदेवीके वश
में होजानेसे कर्त्तव्य अकर्त्तव्य कुछनहीं विचारता था यह बात जब दूतोंसे और राजाओंको मालूम

हुई ॥११॥ तब उनने आपसमें सलाह करके धर्म्मदत्त का राज्य छीन लिया। और उसको राज्य से निकाल दिया ॥ १२ ॥ वह राजा बड़ेभारी भयसे युक्त होकर अपने राज्यको छोड़कर स्त्री

भिः पुरराष्ट्राणि हृतानि निखिलानि वै ॥१२॥ महाभयसमायुक्तो राज्यं त्यक्त्वा पुरं स्वकं ॥ रन्ति देव्या स्त्रियाःसार्द्धं वने राजा पलायितः ॥१३॥ क्षुधा पिपासयायुक्तो नाग्रे गन्तुं स शक्तिमान् ॥ तस्मिन्नेव बनेघोरे दुष्ट शत्रु निवर्हणे ॥१४॥ क्षुधयापीडितो राजा व्याकुलात्मा सुशोचह ॥ कमुपायमहं कुर्य्यां येन क्षुच्छान्ति माप्नुयाम् ॥ १५ ॥ चिन्तयन्वहुशो राजा निश्चयं नाध्यगच्छत्

रन्तीदेवी के साथ वनमें भागचला ॥१३॥ इसी भांति चलतेहुए अति भूष और प्यासके पीड़ित होकर जब नहीं चलसका तब उस घोर वनमें क्षुधासे पीड़ित होकर शोचने लगा ॥ १४ ॥ मैं कौन उपायकरूं जिससे मेरी क्षुधा और तृषा शान्तहोय ॥१५॥ इसी भांति राजा वहुत सोचता

हुआ जब कोई निश्चय नही ठहराया तब फिर अपने मनमें विचार करनेलगा कि मैं अपनी इसी प्रिया को मारकर ॥१६॥ इसके मांससे अपने क्षुधाको समनकरू लज्जासे रंतिदवी से कहता नहीं था और वारं वार रंतिदेवी को देखता था । १७॥ रंतिदेवी राजा धर्म्मदत्तके मनकी बात

त ॥ मनसा चिन्तयन् भूयो हिंसितुं स्वां स्त्रियं प्रियां ॥ १६ ॥ हत्वे मां मांसमस्याहि खादित्वा तृप्तिमाप्नुयाम् ॥ लज्जया नैव तां ब्रूते पुनः पुनः समीक्षते ॥ १७ ॥ बुबोध नृपतेर्वृत्तं रन्तिदेवी जहर्षसा ॥ अहोभाग्यमहोभाग्यं स्वामिनोर्थे तनूरियं ॥ १८ ॥ व्ययमाप्नोति का धन्या योषिदन्या भवेद्भुवि ॥

को जानकर बहुत खुसहुई और अपने भाग्यको सराहने लगी कि धन्य हमारा भाग्यहै कि जो इस शरिरसे हमारे स्वामीका मनोरथ सिद्धहोगा ॥१८॥ और यदि स्वामीके लिये यह हमारा शरीर नष्टहोय तो हमसे कौन दूसरी स्त्री पुण्यवाली होगी इसको विचारकर खुसीके सहित पति

अ० १६. १७०

व्रता रन्तिदेवी अपने स्वामीसे बोली ॥१९॥ कि हे नाथ कृपासिन्धो आपने जो अपने मनमें विचाराहै सो आप मेरे ऊपर बहुत कृपाकी है ॥२०॥ क्योंकि इस हमारे देहको कुत्ते खाजायगे

प्रोवाच स्वामिनं दृष्ट्वा रन्तिदेवी पतिव्रता ॥१९॥ रन्तिदेव्युवाच ॥ भो भो नाथ कृपासिन्धो चिंतितं हृदये त्वया ॥ ममोपरि कृपा स्वामिन्महतीचास्ति तत्र वै ॥२०॥ देहो मे कुक्कुरैर्वापि शृगालैरग्निनापि वा ॥ भक्षितव्योऽत्र किं स्वार्थं भविष्यति पते मम ।२१। भवदर्थे यदि प्रभो शरीरं व्ययमेष्यति ॥ नास्ति धन्यतमा लोके मत्तो नास्ति शुभापरा ॥२२॥ शीघ्रं गृहाण त्वं खड्गं हिंसि मां माचिरं

या सियार खायजायगे या अग्निमे भस्मकरदेंगे इससे अच्छाहै कि आपही के काममें हमारा शरीर कामआवे ॥२१॥ और हे स्वामिन् यदि आपके अर्थ में यह हमारा शरीर नष्टहोजाय तो इससे बढ़के भाग्यवती संसारमें दूसरीभी कोई नहीं है ॥२२॥ हे महाराज आप जल्द तरवार

१७१

को लीजिये और हमको मारडालिये आपके तृप्तिहोनेसे अवश्य हमको स्वर्गहोगा ॥ २३ ॥ अब पराशरजी मैत्रेयसे कहेहैं कि हे मैत्रेय रन्तिदेवी के वचनको सुनकर पापी धर्म्मदत्तने तरवार लेकर

कुरु ॥ त्वत्तृप्त्यैव मम स्वामिन् स्वर्गोभवति निश्चितम् ॥२३॥ श्रीपराशर उवाच ॥ रंतिदेव्या वचः श्रुत्वा खड्गमादाय सत्वरम् ॥ जघान पापनिलयः शुभां नारीं पतिव्रताम् ॥ २४ ॥ मांसं निर्माय नृपतिर्यदास्वादितुमारभत् ॥ व्याघ्री व्यात्ताननाघोरा गर्जन्तीह्यागमन्द्रुतम् ॥ २५ ॥ मांसं त्यक्त्वा भयात्तेषां विद्रुतो नृपतिर्लघु ॥ दूरं गत्वा पतद्भूमौ चिरं संज्ञामवापसः ॥२६॥ एतस्मिन्नन्तरे विप्र

पतिब्रता रन्तिदेवी को मारडाला ॥ २४ ॥ उसके मांसको बनाकर राजा जब खानेको आरम्भ

 किया उसी कालमें बड़ा व्याघ्र मुंहको बा बा कर गरजता हुआ वहां पहुँचा ॥२५॥ तब राजा

डरसे भागचला और कुछदूर जाकर व्याकुल होकर गीरपड़ा और मूर्छित होगया ॥२६॥ इसी

अनन्तर में राजा धर्म्मदत्त जब स्वचेतहुआ तब वेद वेदान्त जाननेवाला और मृगचर्म को
धारण करनेवाला तथा अग्नी के समान प्रकाश वाला ॥ २७ ॥ और भस्म सर्वांगमें लपटे हुआ

वेदवेदांग पारगान् ॥ मृगचर्म परिछिन्न देहान्पावक सन्निभान् ॥२७॥ भस्मो-
द्धूलित सर्वांगान् तेजसा दग्ध किल्विषान् ॥ मौञ्जी यज्ञोपवीताढ्य न् आग-
च्छतो ददर्शसः ॥२८॥ धर्मदत्तोति दुष्टात्मा पूर्वकर्मप्रभावतः ॥ विचिन्त्यसहसा
तत्र गतोनृपति रंतिके ॥२९॥ धर्म्मदत्त उवाच ॥ यूयमुचन्तु मे शीघ्रं युष्माकं
धनमस्तिचेत् ॥ अन्नं वा देहि मे सद्यो नोचेद्वैघातयामि वः ॥३०॥ ततस्तु ब्राह्मणा

तथा तपस्या से भस्महुआ है सब पाप जिसका और मूजकी मखलाको पहिरे हुये एक पुरुषको
देखकर ॥ २८ ॥ धर्म्मदत्त उसके समीप में गया ॥ २९ ॥ धर्म्मदत्त बोला तुमलोग जलदी कहो
तुमलोगके पास धन या अन्नहै यदि मुझको नहीं दोगे तो मैं तुमलोगों को तुरन्त मारडालूंगा ॥

३० ॥ बाद इसके तपस्या ओ व्रतमें अत्यन्त आसक्त ब्राह्मण लोग धर्म्मदत्त से बोले हे राजन्
हमलोग तीर्थाटन करने लिये महिमें विचरते हैं ॥ ३१ ॥ हमलोगों के पास अंग में लगाने का
भस्म है और हमलोग कन्दमूल को भोजन करने वालेहैं और कुछ हमलोगों के पास नहीं है
प्रोचुस्तपोव्रतपरायणाः ॥ विप्र उवाचः ॥ तीर्थाटन प्रकुर्वंतोविचरामोमही-
मिमां ॥३१॥ भस्मादि वसनाराजन्फलमूलोपहारकाः । किं ददामो वयं राजन्
यथेच्छासि तथा कुरु।३२। तच्छ्रुत्वा क्रोधताम्राक्षःक्षुत्पिपासादि पीडितः। नृपति-
र्विह्वलो भूत्वा पतितः पुनरुत्थितः ॥३३॥ तदा तेनैव खड्गेन नृपेण हिंसिता द्विजाः।
तुम जो चाहो सो करो ॥३२॥ इन बातोंको सुनकर राजा क्रोधसे लाल लाल नेत्रको करके भूख
और प्यास से बहुत दुःखित होकर ॥ ३३ ॥ तरवार लेकर ब्राह्मणों के तरफ दौड़ा कितना मरतबे
जमीन में गिरा और फिर उठा इसभांति जहां ब्राह्मण लोग थे वहां पहुंचा और तरवार से उन

१७४

लोगोंके सिरको काटलिया ब्राह्मणों को मारनेके बाद जब राजाने कुछ धन नहींपाया तब बहुत
प्रकार की चिन्ता मे व्याकुल होकर क्षीण होगया ॥ ३४ ॥ इसी समय में पूर्व जन्मके पुण्यके

धनं न लब्धवान्किंचित् राजा चिंतापरायणः ॥३४॥ पूर्वपुण्यप्रभावेन नृपतेर्ज्ञान
मुत्तमं । बभूव सहसा तत्र किं कृतं मे दुरात्मना ॥३५॥ पतिव्रतानां पुज्यापि वनिता
हिंसिता मया ब्राह्मणा ब्रह्मकर्माणो हता विष्णुपरायणाः ॥३६॥ धिग्मांधिग्मांधि
गितिमां विवेक परिवर्जितम् । यमलोकंगमिष्यामि कदा मे निष्कृतिर्भवेत् ॥३७॥
इत्यादि बहुशोराजा सुशोचशोक मानसः यत्र तत्र च धावन्वै नालभच्छर्मकिंच-

प्रभावसे राजाको ज्ञानहुआ तब राजा शोचने लगा हा मुझको धिक्कार है ॥ ३५ ॥ मैंने अपनी
पतिव्रता स्त्रीको मारडाला और विष्णुभक्त तथा वेद वेदान्त को जानने वाले ब्राह्मणों को मार-
डाला ॥ ३६ ॥ मुझको धिक्कारहै धिक्कार है अवश्य मैं यमलोक में निवास करूंगा तब मेरा उद्धार

होगा ॥ ३७॥ इसभांति से वहुत सोच करताहुआ राजा वहुत जगह दौडा फिरा परन्तु उसका शोक शान्त न हुआ ॥ ३८॥ तो फिर घुमते घुमते दूसरे वनमें पहुचा वहां उनको एक कुटी को देखा फिर जाकर शुभकर्म्मा नामक जो मुनी है उस मुनीको देखा ॥ ३९॥ मुनीनेभी

न ।३८। वनाद्वनान्तरंगच्छन्नपश्यदुटजं शुभं । तत्र गत्वा मुनिं दृष्ट्वा शुभशर्मेति नामकम् ३९ स्त्री विप्रघातकं दृष्ट्वा मुनिश्च विमुखोभवत् । राजा तत्संमुखो गच्छं पृष्ठभागे कृतस्तदा ॥४०॥ मुनिनानेन संत्यक्तः पुनः सम्मुखमाययौ ॥ पुनः पृष्ठे कृतो राजा मुनरेवं पुनःपुनः ॥४१॥ पुनः सन्मुखतो राजा मुनेरेव पुनः पुनः । एवं

राजाको स्त्री और ब्राह्मण वध करनेवाला समझकर राजासे विमुख हुये तव फिर राजा मुनीके सामने आपहुंचा तव फिर मुनीने उसके मुखके तरफ पीठ करलिया ॥ ४० ॥ इस प्रकार मुनीने जव पापी राजाको तिरस्कार किया तवफिर राजा मुनीके सन्मुख हुआ फिर पूर्ववत् राजा उस

के तरफ पीठ करलिया कई एकवार राजा मुनीके तरफ अपना मुख लेगया परन्तु मुनीने राजा के मुखको नहीं देखा ॥ ४१ ॥ तव राजा मुनीके पृष्ठभागको देखकर हाहा कार करके भुमिपर गिरपड़ा और मुर्छित होगया ॥ ४२ ॥ तव मुनिने राजाको पापी और ब्रह्मघाती समझकर कहा

क्रमेण राजा तु परिक्रम्यमुनिंतदा।४२। मुखस्यदर्शनं नास्ति पृष्ठभागंविलोकयन् । पपात मूर्छितो राजा हा हतोस्मिब्रुवंस्तदा।४३। ततो मुनिस्समालोक्य पापिनं ब्रह्मघातिनं। उवाच निष्ठुरंवाक्यं गच्छगच्छ वनंप्रति ॥४४॥ अत्रैववासस्थानं ते घातकस्य न विद्यते । इतितस्यमुनेर्वाक्यं श्रुत्वा राजातिपीडितः ॥४५॥ त्राहि

इवात बोले वह सुनकर अति पीडित हो राजा वोला मैं आपके शरणमें आयाहूं आप रक्षा करो आप रक्षा करो ॥४३॥ वाद इसके मुनिने दाया वस होकर राजा को दुःखित समझ कर राजासे वोले जावो जावो वनमे ॥ ४४ ॥ तू कौन है और किसहेतु से तू इसदशाको प्राप्तहै सो

कह तब राजा ने पहिला जो वृत्तान्त है वह मुनी को कह सुनाया ॥४५॥ त्राहि त्राहि त्राहि मैं शरणमें दुःखितहौं राजाको दुखित देखकर मुनिका दया प्रगट किया ॥४६॥ मुनि कहते हैं हे

त्राहीतित्राहीति त्राहिमांशरणागतं दुःखितंनृपतिं दृष्ट्वा करुणा पीडितोमुनिः ४६ प्रोवाच कस्त्वं केन मां दशांप्राप्तोऽसिब्रूहिमां। पूर्ववृत्तं निजंराज्ञा कथितंमुनये तदा ॥४७॥ नृपतेर्वचनंश्रुत्वा शुभशर्म्माब्रवीद्वचः। ध्यात्वासर्वं तु सर्वज्ञो करुणा पूर्णमानसः ॥४८॥ मुनिरुवाच॥ शृणुराजन्प्रवक्ष्यामि तव पापस्यशांतये। संतितीर्थान्यनेकानि मिथिलायां क्षितीश्वरः ॥४९॥ माहात्म्यंनैवशक्नोमि वक्तुंवर्षश

राजन् इस दशाको तुम कैसे प्राप्त भया सो वर्णन करो तब राजा पूर्व वृत्तान्त मुनिसे कहते भये ॥४७॥ राजाके वचनको सुनकर सब बातको ध्यान करके दयावान् शुभकर्म्मा नामक ॥४८॥ ब्राह्मण बोले हे राजन् आपके पापकी शान्तिके लिए जो कहताहूं सो सुनो मिथिला नामके

सब तीर्थके ईश्वर ॥४९॥ हे राजन् मिथिलामें नानाविध तीर्थ हैं उनका माहात्म्य सुनो यद्यपि मिथिला का माहात्म्य हजार वर्षमेंभी कोइ नहीं कहसक्ताहै तथापि संक्षेपमें सुनो मिथिलामें बहुत पुण्य देनेवाला एक जनक सागरहै ॥५०॥ उसको देखने से तथा स्पर्श करनेसे कोटि२

तैरपि तत्रास्त्येकं शुभंराजन्तीर्थं जनकसागरम् ॥५०॥ दृष्ट्वा स्पृष्ट्वा नरः कोटि ब्रह्महत्यादि गो भवेत् ॥ गच्छराजन्द्रुतं तत्र स्नानात्पापक्षया भवेत्॥५१॥ मुनेश्च वचनं श्रुत्वा प्रोवाच विनयान्वितः ॥ धर्मदत्त उवाच ॥ विश्वासो नैव मे ब्रह्मन्द्

ब्रह्महत्यादि पातकसे मनुष्य छूट जाताहै हे राजन् आप वहां जाइये आपकी ब्रह्महत्यादि वि-
१७० विध जो पापहै वे सब नाश होजायगें ॥ ५१ ॥ मुनिके इस वचनको सुनकर विनयके सहित
राजा धर्मदत्त बोला हे मुनीश्वर मुझको विश्वास नहीं होताहै क्योंकि मैं बड़ाभागी पापीहूं किस १७१
भांति मेरा पाप नष्ट होगा ॥५२॥ पाप नष्टहोनेका कोई चिन्ह बताइये जिसमें हम समझेंगे कि

मेरा पाप नष्टहुआ राजाकी यह बात सुनकर मुनि ने राजाके विश्वासके लिये एक काला कपड़ा राजाको देकर यह बोले कि हे राजन् आप अपनी विश्वासके लिए यह मेरा बात सुनिए ॥५३॥

पाप बाहुल्यमस्तिमे ५२ कथं मत्पातकं नष्टं जानेहं द्विजसत्तम ॥ तच्छ्रुत्वा नृपते र्वाक्यं दत्वा नीलपटं मुनिः॥५३॥ उवाच नृपतिं तत्र विश्वासार्थं तदावचः ॥ शुभ शर्म्मोवाच ॥ श्रूयतां नृपशार्द्दूल तव विश्वासकारकं ॥ ५४ ॥ जनकस्य सरो दृष्ट्वा यदा नीलःसितो भवेत ॥ तदेव त्वं विजानीहि पापं मे संक्षयं गतम् ॥५५॥ इत्युक्त्वा विररामाथ वस्त्रं गृह्य गतो नृपः ॥ हृष्टः शरीर संधाय मिथिलांप्रति स-

शुभशर्म्मा बोले हे राजन् तुम्हारे विश्वासके लिए सुनो ॥५४॥ श्रीजनकजीके सरोवर को देखने से जब यह काला वस्त्र सफेद होजाय तब समझना कि हमारा सब पाप नष्ट होगया ॥५५॥ मुनी इस बातको कहकर चुप होगये और राजानेभी काले वस्त्रको लेकर तुरत मिथिलापुरीको चले ५६

श्रीजनकजी के सरोवर को देखकर जब कालावस्त्र श्वेत होगया तब राजा बहुत प्रसन्न हुआ और साष्टाङ्गप्रणाम करनेलगा और पापरहित अपने शरीरको देखकर अत्यन्त हर्षको प्राप्त हुआ ।५७ त्वरम् ।५६। जनकस्य सरो दृष्ट्वा नीलवस्त्रं सितं यदा ॥ बभूव नृपतिर्हृष्टः सर्व पापाति गो भवत् ॥५७॥ तत्र स्नानं कृतं राज्ञा सागरे जनकस्य हि ॥ तच्छरीरं परित्यज्य दिव्य देह धरो भवत् ॥ ५८ ॥ कोटिसूर्य्यप्रतीकाशं विमान वरमारुहत् ॥ कोटि कन्दर्प शदृशो नानाभरणभूषितः ॥ ५९ ॥ अप्सरोगण संकीर्णो वै दूर्य्यादिविभूषितः ॥ दिव्यांबरधरः स्रग्वी दिव्य गंधानुलेपनः ॥ ६० ॥ अनन्तर जब राजाने जनकके सागर में स्नानकिया और कल्पतरु को अर्थात् कल्पवृछ को दर्शन किया तब उस देहको छोड़कर सुन्दर देहको धारन करके ॥५८॥ हजारों सूर्यके समान तेजहै जिसका सो विमान के उपर चढकर कोटि २ कामके समान शोभा और दिव्य दिव्य

१८१

वस्त्रोंको और उत्तम २ मालावों को धारण करके ॥५९॥६०॥ विष्णु पुरको अर्थात् वैकुंठको प्रस्थान किया ॥ ६१ ॥ इसीभांति जो मनुष्य जनकके सरोवरमे स्नान करताहै और कल्पतरु

दिव्यलोकं गतो राजा पुनरावृत्ति वर्जितं ॥ गन्धर्वैरप्सरोभिश्च वीज्यमानः सुसत्कृतः ॥ ६१ ॥ श्रीपराशर उवाच ॥ इति ते कथितं विप्र माहात्म्यं सागरस्य हि ॥ यःश्रृणोति नरोभक्त्या स तु गर्भं न पश्यति ॥६२॥ जनकस्य सरो दृष्ट्वा दृष्ट्वा कल्पद्रुमं पुनः ॥ स्नात्वा पीत्वा नरोयाति पदं शाश्वतमव्ययम् ॥६३॥ धन्यं यशस्यमारोग्य मायुष्यंस्वर्गदं तथा ॥ ॥ ६४ ॥

को दर्शन करताहै सो सब भांतिके मनोरथको प्राप्त करताहै ॥ ६२ ॥ जनक सरोवरको जो दरशन करैंगे और कल्पवृक्ष का दरशनकरने स्नानकरने से जलपीनेसे स्वाशत पद अविनाशी पद को प्राप्तहोयगे ॥ ६३ ॥ इस कथाको श्रवण करने से धनको वृद्धि और यशका लाभ और शरीर

में आरोग्यता प्राप्त होती हैं ॥ ६४ ॥ इतिश्रीवृहद्विष्णुपुराणे मिथिलामाहात्म्ये अष्टवि
शोऽध्याय ॥ २८ ॥ १६ ॥

इतिश्रीवृहद्विष्णुपुराणेमिथिलामाहात्म्येपराशरमैत्रेयसम्वादेषोडशोऽध्यायः १६

मैत्रेयउवाच राज्ञो दशरथस्यास्ति मिथिलायां सरः शुभम् ॥ यत्र स्नात्वा वि
मुक्तो भूद्ब्रह्मणो हत्यया शिवः ॥१॥ श्रूयते कथ मे तद्धि ब्रूहि विस्तरतो मुने॥
सर्वज्ञो सिवदान्योसि श्रद्दधानाय मे प्रभो ॥२॥ श्रीपराशरउवाच ॥ शृणु विप्र क-

दो० सप्तादश अध्यायमें ब्रह्महत्या शिवपाय, रामायण छुट्योतवै दशरथ शर दरशाय ॥ १७ ॥

पुनः मैत्रेयजी पराशरजी से पूछतेहैं हे माहाराज मिथिलापुरी में एकशरोवर श्रीदशरथजी का भी है जिसमें स्नान करने से श्रीमहादेवजी की ब्रह्महत्या छुटगईथी ॥१॥ इसकथाको मैं संक्षेप से श्रवण करचुकाहूं अब यथार्थ विस्तार पूर्वक श्रवण करनेकी इच्छाहोती है यदि मेरे ऊपर अनुग्र

ह है तो वर्ण करिये ॥ २ ॥ श्रीपराशर जी बोले हे मैत्रेय यह कथा सर्व पापोंको विनाश करनेवा
ली है मैं तुह्मारे ऊपर कृपाकरके इस कथाको कहता हूं एकाग्रचित्त होकर सुनो ॥३॥ पहिले के
समय में सरस्वती जीके अतिमनोहर स्वरूपको देखकर ब्रह्माजी कामासक्त होगए उनसे मन
थामेतां सद्यःपाप विनाशिनीं ॥ कथयामितवाग्रेहं समाहितमनाभवः ॥३॥ पुरा
सरस्वतीं दृष्ट्वा लोकोत्तर स्वरूपिणीं ॥ कामासक्तो भवद्ब्रह्मा मनरोद्धुं न शक्ति-
मान् ॥४॥ ग्रहितु धावमानं तं कामान्धं पितरं गुरूं ॥ दृष्ट्वा तं विस्मिता वाणी-
धिक्चक्रे धर्म सेतुभित् ॥ ५ ॥ जगतामीश्वरोसि त्वं गर्हितुं कुरुषे कथं ॥ श्रुति
नहीं रोकागया ॥ ४ ॥ तव सरस्वती जीके साथ संभोग करनेके लिये दौडे जव लोकके माता
पिता ब्रह्माजी काममे विह्वल तथा कामान्ध होगए तव सरस्वती महारानी पिता ब्रह्माजीको इस
भांति देखकर भागचलीं ॥५॥ और लौकिक वाक्यके अनुसारसे निवारण करने लगीं हे पितः

आप धर्म्मको जानतेहैं वेदके सेतुउल्लङ्घन करतेहैं क्या पशुवत् बुद्धिभया ॥६॥ वहुत आरत होकर वाणी अर्थात् सरस्वती वोलीं तद्यपि ब्रह्मा नहीं माना तब वाणी त्राहि त्राहि वोलनेलगीं ॥७॥ और आप सब प्राणियोंको पालेहैं इसकालमें आप कामके वस होकर नरक जानेकी इच्छा कर

सेतुं समुल्लंघ्यवर्तसेपशुबुद्धिवत् ॥६॥ वहुशोभ्यर्थितोवाण्या न निवृत्तस्तदाविधिः द्रुद्रावेण वपुर्धृत्वा त्राहित्राहीति वादिनीम् ॥७॥ सोप्यन्वधावद्दक्षस्य वपुषा-रन्तुमंगजां ॥ रे धमाधम दुष्टात्मन्श्रुति सेतुं न नाशयेः ॥ ८ ॥ निवर्तस्व नि-वर्तस्व पस्यैतां तनुजां हि माम् ॥ ईश्वरस्ये दृशं कर्म भवितुं कथमर्हति ॥९॥

ते हैं ॥८॥ हे ब्रह्माजी आप मुझ को अपनी पुत्री समझिये मैं आपहीसे उत्पन्नहूं आप लोक निन्दितकर्म करनेकी इच्छा क्यों करते हैं ॥९॥ इस प्रकार सरस्वती ब्रह्माजीको वहुत समझाई पर जव बृह्मा जीने नहीं माना तब देवतालोग हाहाकार करनेलगे और बोले रे नीचोंमें नीच तूं वेदके

रास्तेको विनाश करताहै तूंजगतका इश्वरहै धर्म्मको चलानेवालाहै तेरे लिये यह निन्दित कर्म्म करना उचित नहीं है ॥१०॥ अनन्तर श्रीमहादेवजी भी इस वृत्तान्तको जान गए कि ब्रह्माने

वहुसोपि वदंतित्थं धावमानैव भारती ॥ नन्यवर्त्तत कामाग्नि दग्धप्रज्ञः प्रजापतिः ॥ १० ॥ निः संज्ञा पतिता भूमौ त्रातारंनाधि गच्छति ॥ रन्तुं प्रवृत्तं ब्रह्माणं तनुजां वीक्ष्य शंकरः ॥ ११ ॥ धर्मपालन संसक्तः मानसो गिरजापातिः ॥ येन त्यक्ता सतीं साध्वीं श्रुति सेतु र्दृढीकृतः ॥ १२ ॥ वेदमुल्लंघ्य गंतॄणां घोर दण्ड प्रदः प्रभुः ॥ वेदमुल्लंघ्य गंतारं स्व पुत्र मपिनेक्षते ॥ १३ ॥ महाक्रोध

अपनी पुत्रीके साथ निन्दित कर्म किया है ॥११॥ धर्म पालन संसक्तः मानसमे गिरिजापति जो महादेवहैं जो सती येसी इस्त्रीको त्यागकर वेदके मार्ग दृढकिया ॥ १२ ॥ श्री महादेवजी अपने मनमे विचारतेहैं की वेदमार्ग उल्लंघन करनेवाला (गंतृना) गमन करनेवालेका घोर दंड

होना चाहिये हे प्रभु जदी स्वपुत्र होय तोभी दंड योगहै ॥१३॥ तब महादेव जीने अपने त्रिशूलसे ब्रह्माके शिरको काट डाला ॥१४॥ उस ब्रह्म हत्याके प्रभाव से उसी कालमें वह सिर महादेवजी के हाथमें लगगया इसको देखकर सब देवतालोग विस्मित होगये फिर महादेवजीभी इस चरित्र

समापन्नः प्रागृहीच्छूल मुत्तमम् ॥ गत्वाद्भुतं त्रिशूलेन शिरः कायात्तदा हरत ॥१४॥ तच्छिरस्तत्करेसक्तं हत्यया घोरया विधेः ॥ मोच्यमानमपीशेन न-मुंचति शिरःकरम् ॥१५॥ कृततीर्थादि सकलं न कराच्चलितं शिरः ॥ ईश्वरस्याऽपि मैत्रेय पश्यरीतीं सनातनीं ॥१६॥ भुक्त्वापि क्लेशं धर्मस्यमार्गं रक्षति सर्वदा ॥

को देखकर आश्चर्यित हुए और बोले हे शिर हमारे हाथको छोड़दो २ और जिस उपायसे हाथसे शिर छूटजाय वह उपाय भी किया परन्तु हाथसे शिर नहीं छूटा ॥१५॥ तब ब्रह्महत्यासे तप्त होकर महादेव जी बहुत व्याकुल हुये और बहुत तीर्थादिको भी भ्रमण किया परन्तु हाथसे शिर

नहीं छूटा ॥१६॥ तब महादेवजी धर्मका रक्षा करने के लिये नाना प्रकारके दुःखको सहनेलगे क्योंकि धर्मके प्रतिष्ठित रहनेहीसे मनुष्यको उत्तम गति प्राप्त होती है ॥ १७ ॥ धर्म्महीसे पुरुष सबभांतिके सुखको भोग करताहै धर्म्मकी आश्चर्य्य गति है यदि देवता होवें और वे धर्म्म से भ्रष्ट

धर्मेप्रवीष्टः पुरुषः सद्गतिं लभते शुभां ॥१७॥ धर्मात्सर्वसुखप्राप्तिर्द्धर्मस्यगतिरद्भुता ॥ श्वा शूकरइवज्ञेयो धर्माद्भ्रष्टो नरोपिहि ॥१८॥ तस्माद्धर्मं सदारक्षेदात्मनः शुभमिच्छता ॥ धर्माद्धीनाः सुतास्त्याज्या पितामाता सुहृत्प्रियः ॥१९॥ धर्म एव धनं नित्यं धर्म एव सुखप्रदम्॥ धर्महीनस्य धिग्जन्म धिक्शतं धिक्

होवें तो उनको कुत्ता और शूकर जानना चाहिये॥१८॥ इस लिये जो पुरुष अपना कल्याण चाहे तो सर्वदा धर्म्मकी रक्षाकरे क्योंकि धर्म्महीके आधीन पुत्र राजा पिता माता और मित्र होतेहैं।१९। धर्म्महीं संपूर्ण धन और धर्म्महीं सुखको देनेवालाहै स्वर्ग तथा मोक्ष इन दोनोंको देनेवाला धर्म्म

